। श्री गणेशायनमः ।

शङ्कराङ्कस्थिता शान्ता सान्तान्तकापहा ।
शशाङ्कालंकृता कान्ता शाङ्करी शंकरोतु नः ॥ १ ॥

प्रथममस्य ग्रन्थस्य कर्तातत्रभवान् श्रीमान् श्रीवाग्भटः 'समाप्तिकामो मङ्गलमाचरेत' इति श्रुतिवचः प्रतिपालयन्, चिरन्तनं शिष्टाचारं चापरिहरन्, शिष्योपदेशायाशीः स्वरूपं मङ्गल-माचरति:—

श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ।
मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥ १ ॥

श्रियमिति] दीव्यति प्रकाशते इति देवः ज्ञानप्रकाशेन भासमान इत्यर्थः यद्वा दीव्यति क्रीडति समाधिद्वारा परमात्मनि इति देवः, नाभेरपत्यं नाभेयः, श्रिया शोभया उपलक्षितो नाभेयः श्रीनाभेयः, यद्वा श्रीः लक्ष्मीः नाभेयः नाभेस्तत्र ब्रह्मा ताभ्याम् उपलक्षितः, अनेन जिनस्य विष्णुरूपता प्रदर्शिता. यद्वा श्रियः सकलशास्त्रनिष्णातत्वसमृद्धेः इनः स्वामी इति श्रीनः नास्ति किमपि भेयं भीतिं जननक्षमं यस्य इति अभेयः जिनः बुद्धः सदा नित्यं वः युष्माकं अलङ्कारशास्त्रं पठितुमिच्छतामित्यर्थः श्रियं विघ्नविनाशस्वरूपां मङ्गलात्मिकां वा लक्ष्मीं दिशतु ददातु । कोयं जिन इत्याह—यस्य जिनस्य आगमपदानां सिद्धान्तवा-क्यानां आवली समूहः सतां सज्जनानां मोक्षस्य नित्यनिरतिशय सुखाभिव्यक्तिस्वरूपायाः मुक्तेः मार्गं पन्थानं ब्रूते कथयति केनो पायेन मोक्षो लभ्य इति दर्शयतीति भावः । अस्य पद्यस्य विष्णु देवतापरतापि सम्भवति । अस्मिन् पक्षे 'वो' (उ+वः) इति पदद्वयं बोध्यम । उकारस्य पादपूरणार्थत्वम । देवः देवत्वजाति

विशिष्टः अलौकिकसामर्थ्यशाली यः श्रीनः लक्ष्मीपतिः अभयः भीतिरहितः जिनः जिनावतारः अः विष्णुः अकारो वासुदेवः स्यात् इत्येकाक्षरकोशवचनात्, वः श्रियं दिशतु ददातु। यस्य व्यासावतारस्य विष्णोः आगमपदानां वेदान्तसिद्धान्तानाम् आवली समुदायः शेषं पूर्ववत् ॥

सम्प्रति काव्यलक्षणगर्भं काव्यफलमाह—

साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥ २ ॥

साध्विति) साधू वक्ष्यमाणानर्थकत्वादिशब्ददोषेदश-विरुद्धत्वाद्यर्थदोषशून्यौ यौ शब्दार्थौ तयोः सन्दर्भः घटना यत्र तत्, गुणाः वक्ष्यमाणौदार्यादयः अलङ्काराः वक्ष्यमाणचित्र जात्यादयः तैः भूषितमलङ्कृतम्, स्फुटाः परिव्यक्ताः अनायासबोध्या इति यावत् रीतयः तत्तद्रसानुसारिशब्दसंकलनात्मिकाः गौडीप्रभृत्यः वक्ष्यमाणाः रसाः शृङ्गारादयः तैः उपेतं युक्तं काव्यं कवेः कर्म काव्यं सहृदयहृदयाल्हादकरं वाक्यं कीर्तये यशसे कुर्वीत रचयेत्। 'काव्यम्' इति कर्मणा 'कविः' कर्ता लक्ष्यते यद्यपि श्रीमम्मटपादैः काव्यस्य 'काव्यं यशसे ऽर्थकृते व्यवहार विदे शिवेतरक्षतये। सद्यः पर निर्वृतये कान्ता संमिततयोपदेश युजे ॥' इति अनेकफलत्वं प्रतिपादितम्, तथाप्यत्र प्राधान्येन, कीर्त्यतिरिक्तानामर्थोपार्जनव्यवहारज्ञानादीनामपि अवसाने कीर्तावेव पर्यवसानाद्यशः स्वरूपत्वेनवाकीर्तेरेवकाव्यफलता स्वीकृता

अथ कवितोत्पत्तिसाधनान्याह—

प्रतिभाकारणं तस्य व्युत्पत्तिस्तु विभूषणम् ।
भृशोत्पत्तिकृदभ्यास इत्याद्य कवि संकथा ॥ ३ ॥

प्रतिभेति) तस्य काव्यस्य प्रतिभा नवनवार्थाविष्करणक्षमालौकिकप्रज्ञाकिः बुद्धिः कारणं हेतुरस्ति व्युत्पत्तिः विविधशास्त्रसंशीलनजन्या योग्यता विशेषविभूषणं शोभाधायकमस्ति अभ्यासः नैरन्तर्येण संशीलनं तस्य काव्यस्य भृशं उत्पत्तिकरोतीति भृशोत्पादिकृत् यद्वा कविता कारयतीत्यर्थः इति आद्यकवीनां प्राचीनकवीनां संकथा कथनमस्तीति शेषः ॥

अथ प्रतिभालक्षण माह—

प्रसन्नपदनव्यार्थयुक्तयुद्बोधविधायिनी ।

स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा सर्वतो मुखी ॥४॥

प्रसन्नेति) प्रसन्नानामक्लिष्टाक्षरघटितानां पदानां शब्दानां नव्यैः नवीनैः पूर्वं मननुभूतै रित्यर्थः अर्थैः वर्णनाविषयैः सह युक्तिः योगः संघटनेति यावत् तस्याः उद्बोधं विशिष्टज्ञानं विदधातीति तथाभूता, स्फुरन्ती परिस्फुरणवती स्वकर्मणि तडिदिव चपलेति भावः, सर्वतो मुखं यस्याः सा सर्वतोमुखी परितः प्रसरणशीला सर्वविषयावगाहिनीत्यर्थः सतः उत्तमस्य कवेः बुद्धिः प्रतिभा कथ्यते इति शेषः ॥

अथ व्युत्पत्तिलक्षणम्

शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका ॥ ॥

प्रतिपत्तिरसामान्या व्युत्पत्तिरभिधीयते ॥ ५ ॥

शब्देति) द्वन्द्वान्तश्रुतशब्दानां प्रत्येकाभिसम्बन्धात् शब्दादीनां शास्त्रशब्देन सम्बन्धः शब्दशास्त्राणि व्याकरणादीनि

धर्मशास्त्राणि, जैनाभिमतप्रतिपादकाः ग्रन्थाः, कामशास्त्राणि वात्स्यायनादिग्रन्थाः आदिशब्देन छन्दःशास्त्रादिग्रहणंतेषु आम्नायः गुरुपरम्परोपगतः उपदेशः पूर्वः यस्याः तादृशी असामान्या विशेषा प्रतिपत्तिः ज्ञानविशेषः व्युत्पत्तिः अभिधीयते कथ्यते ॥

अभ्यासलक्षणमाह—

अनारतं गुरूपान्ते यः काव्ये रचनादरः ।
तमभ्यासं विदुस्तस्य क्रमः कोप्युपदिश्यते ॥ ६ ॥

अनारतमिति) अनारतं निरन्तरं गुरूपान्ते गुरुसमीपे काव्ये काव्यविषये यः रचनादरः श्रद्धापूर्वकः संकलनश्रमः तं अभ्यासं विदुः कथयन्ति पण्डिता इति अध्याहार्यम्। तस्य अभ्यासस्यकोपि सूक्ष्मः नतु दीर्घः क्रमः रीतिः उपदिश्यते पाठ्यते अध्यापकेनेति शेषः ॥

काव्ये छन्दसामुपयोगित्वं तद्वशीकरण प्रकारं चाह—

विभ्रत्या बन्धचारुत्वं पदावल्यार्थशून्यया ।
वशीकुर्वीत काव्याय छन्दांसि निखिलान्यपि ॥७॥

विभ्रत्येति) बन्धस्य रचनायाः चारुत्वं मृदुवाणीविशिष्टत्वेन रमणीयत्वं विभ्रत्या दधत्या अर्थशून्यया निरर्थकयापीत्यर्थः पदावल्या शब्दश्रेण्या निखिलानि सर्वाणि छन्दांसि श्रीनारीप्रभृतीनि वशीकुर्वीत स्वाधीनतां नयेत् । यत्कश्चित्कवितां चिकीर्षुरिदं [illegible] शब्दसंघटनाभ्यासेन समस्तवृत्तानि स्वाधीनानि कुर्यात इति भावः ॥

बन्धचारुत्वकारणान्याह—

पश्चाद्गुरुत्वं संयोगादिसर्गाणामलोपनम्
विसन्धिवर्जनं चेति बन्धचारुत्वहेतवः ॥ ८ ॥

पश्चादिति) संयोगात् संयुक्ताक्षरात् पश्चात् प्रथममित्यर्थः लघोरपि पूर्ववर्णस्य गुरुत्वं विधेयं तथा विसर्गाणां अलोपनं लोपोऽत्र न कर्तव्यः, विसर्गसद्भावस्य ओजोगुणजनकत्वात् इतिभावः विसन्धेः विषमस्य विकटस्य वा सन्धेश्च वर्जने त्यागोऽविधेयः, इति एतानि त्रीणि बन्धचारुत्वस्य सन्दर्भरमणीयतायाः हेतवः कारणानि सन्ति ॥

उक्तहेतूनामभावे बन्धस्यामनोहरत्वमुदाहरति—

शिते कृपाणे विधृतेत्वया घोरे रणे कृते ।
चर्षीश क्षितिपा भीत्या वनएव गता जवात् ॥ ९ ॥

शित इति) हे चर्षीश नरराज ! त्वया शिते तीक्ष्णधारे कृपाणे खड्गे विधृते गृहीते सति तथा घोरे भयानके रणे युद्धे कृते सति क्षितिपाः विरुद्धराजानः भीत्या भयेन जवात् वेगेन द्रुत-गत्येत्यर्थः वन एव गताः काननं गत्वा आत्मगोपनं चक्रुरिति-भावः । अस्मिन्पद्ये विधृते त्वया' 'इत्यत्र "ते" इत्यस्य गुरुत्वं संयुक्ताक्षर-'त्व'-कृतं नास्ति किन्तु प्रकृतिसिद्धमस्ति । "चर्षीश" इत्यत्र सन्धेः उच्चारणकष्टजनकत्वेन विकटता; "क्षितिपा भीत्या" इत्यत्र विसर्गाणां लोपः कृतोऽस्तीति पूर्वोक्तहेतुत्रयाऽभावेन बन्धस्य शैथिल्यम्, शैथिल्यं च बन्धसौन्दर्यनाशकम् ॥

नव्यार्थस्यापरिस्फूर्तावपि काव्यरचनाभ्यासो विधेय इत्याह—

अनुल्लसन्त्यां नव्यार्थयुक्तावभिनवत्वतः ।
अर्थसंकलनात्त्वमभ्यसेत्संकथास्वपि ॥ १० ॥

अनुल्लसन्त्यामिति) अभिनवत्वतः कवेः अभिनवत्वात् नूतनत्वेन परिपक्काभ्यासशून्यत्वेनेति यावत् नव्यस्य पूर्वमननुभूतस्य अर्थस्य वर्णनीयस्य विषयस्य युक्तौ संघटनायां अनुल्लसन्त्यां अनाविर्भवन्त्यां अजायमानायामित्यर्थः संकथास्वपि लौकिकव्यवहारसम्भाषणेष्वपि अर्थस्य संकलनातत्त्वं संघटनप्रकारं अभ्यसेत् निरन्तरमनुशीलयेत् ॥

तदेवोदाहरति—

आगम्यतां सखे ! गाढमालिङ्ग्यात्र निषीद्त्र ।
सन्दिष्टं यन्निजभ्रातृजायया तन्निवेदय ॥ ११ ॥

आगम्यतामिति) हे सखे मित्र ! आगम्यतां त्वयेति शेषः, गाढं दृढं आलिङ्ग्य समाश्लिष्य अत्र अस्मिन् आसने निषीद उपविश ! निजभ्रातुः तव अनुपमप्रेमपात्रस्य मित्रस्य ममेत्यर्थः जायया स्त्रिया, इत्यत्रेतद्धि लोकव्यवहारे भ्रातृशब्दस्य असाधारणा सौहार्दसूचनयोग्यता, यत् सन्दिष्टं यः सन्देशः प्रेषितः तत् निवेदय कथय ॥

परार्थहरणं न विधेयमित्याह—

परार्थबन्धाद्यश्च स्यादभ्यासो वाच्यसंगतौ ।
स न श्रेयान्यतोनेन कविर्भवति तस्करः ॥ १२ ॥

परार्थेति) वाच्यस्य अर्थस्य संगतौ घटनायां परार्थबन्धात् अन्यकविकृतार्थरचनासाहाय्येन यः अभ्यासः वारं वारं काव्यविरचनविषयको यत्नः स न श्रेयान् प्रशंसनीयो न भवति । अतः यस्मात् अनेन छद्मप्रायेण अभ्यासेन कविः तस्करः चौरः

धारवत् निन्द्यो वा भवति । दर्पणकारेणाप्यभिहितम्—

"कृतिमग्रथितान्यार्थे कविमन्तिं ममभवे" इति । अन्यच्च पतितकृत्य पादैः श्रीदौर्गादशिहारिकृष्णशर्मभिः समुद्गीरितं मल्लारपुष्पाञ्जलौ—

"अपहृत्य ये त्वनर्घपरपद्यरचनार्थसंश्रयचौराः । स्वकृतं वदन्ति काव्यं पापास्ते जारसंभूताः" । इति ।

॥ समस्यायां परार्थहरणस्य निर्दोषतां दर्शयन्नाह—

परकाव्यग्रहोपि स्यात्समस्यायां गुणः कवेः ।

अर्थं तदर्थानुगतं नवं हि रचयत्यसौ ॥ १३ ॥

परेति) समस्यायां पूरणमाकांक्षायाः परकृतः पूरणे परकाव्यस्य अन्यकविकृतकवितायाः ग्रहः उपादानं कवेः गुणः स्यात् । हि यस्मात् कारणात् असौ समस्याकारकः तदर्थस्य परकाव्यार्थस्य अनुकूलं नवं नवीनं अर्थं रचयति । समस्यापूर्तौ अन्यकविनिर्मितपादमेकं पादद्वयं वा हरन्नपि समस्यापूरकः कविः साकांक्षं परार्थं स्वमतिनातिशयसुघटितामिव नवार्थेन निराकांक्षी कुर्वन् स्तूयते इति समस्यायां परकविताहरणं न दूषणम् ।

अर्थप्रकाशतामग्रीमाह—

मनः प्रसत्तिः प्रतिभा प्रातःकालोभियोगिता ।

अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः ॥१४॥

मन इति) मनसः प्रसत्तिःस्वच्छता, प्रतिभा पूर्वोक्तलक्षणो बुद्धिविशेषः, प्रातःकालः प्रभातसमयः तदानीं बुद्धिदर्पणस्य निर्मलतया नवीनार्थाविष्करणयोग्यतेत्यनुभवसिद्धम्, अभियो-

गिता अभियोगः नव्यार्थविरचनविषयकः उद्योगः सोऽस्त्यस्येति अभियोगीतस्यभावः अभियोगिता, नूतनार्थरचना यत्नपरायणतेत्यर्थः, अनेकशास्त्रदर्शित्वं बहुशास्त्रावलोकनाभ्यासः इति पूर्वोक्ताः अर्थालोकस्य अर्थप्रकाशस्य हेतवः कारणानि सन्ति ।

अर्थविन्यासप्रकारमाह—

समाप्तामिव पूर्वार्धे कुर्यादर्थप्रकाशनम् ।
तत्पुरुषबहुव्रीही नर्मिथः प्रत्ययावहो ॥ १५ ॥

समाप्तमिति) पूर्वार्धे पद्यस्य प्रथमे अर्धे अर्थस्य प्रकाशनं विन्यासं समाप्तम् इव समाप्तप्रायं नतु समाप्तमेव कुर्यात् विदध्यात् तत्पुरुषबहुव्रीही समासौ मिथः प्रत्ययावहौ परस्परप्रतीतिकारकौ न कर्तव्यौ सन्देहशून्यौ कार्यौ इत्याशयः । यथा "वृत्रशत्रुः" इत्यत्र किं 'वृत्रःशत्रुः यस्येति' बहुव्रीहिः, आहोस्वित् 'वृत्रस्यासौ शत्रुश्च' इति तत्पुरुषः । इति संशयः समुत्पद्यते । एतादृक् सन्देहजनकः समासो न कार्यः ॥

शिक्षाविशेषमाह—

एकस्यैवाभिधेयस्य समासव्यासमेवच ।
अभ्यसेत्कर्तुमाधानंनिःशेषालङ्क्रियासुच ॥ १६ ॥

एकस्यैवेति) एकस्यैव अभिधेयस्य अर्थस्य वर्णनीयस्य वस्तुनः इत्यर्थः समासं संक्षेपं व्यासं विस्तारं च कर्तुं अभ्यसेत् । यथा अलौकिकबुद्धिः इत्यर्थे वर्णनीये 'प्रतिभा' इति समासेन कथनम्, 'नवनवोन्मेषशालिनी बुद्धिः' इति व्यासेन । एवं एकस्यैव अर्थस्य निःशेषालङ्कारान् सम्पूर्णालङ्कारेषु च आधानं विन्यासं कर्तुं अभ्यसेत् । यथा 'अस्या आननं मनोहरम्' इत्य-

कस्मिन्नर्थे वर्णनीये मस्या आननं चन्द्रः मनोहरः' इति रूपकेण 'अस्यामुखं चन्द्रइव मनोहरम्' इत्युपमया, 'अस्याननं चन्द्रश्रियं चोरयति' इति प्रतीपेन, 'इदमाननं न किन्तु चन्द्रः' इति अपह्नुत्या, 'चन्द्रोऽयमाननं वा' इति भ्रान्तिमदलङ्कारेण वर्णनम्।

शिक्षान्तरमाह—

स्यादर्द्धान्तपादान्ते प्यशैथिल्ये लघुर्गुरुः।
तदादौ न च वक्तव्याश्चादयः प्रायशो बुधैः॥१७॥

स्यादिति—अर्द्धान्तपादौ द्वितीयचतुर्थपादौ, न अर्द्धान्तपादौ अनर्द्धान्तपादौ प्रथमतृतीयपादौ तयोः अन्ते अवसाने अपिनाद्वितीये चतुर्थपादान्तग्रहणम् अशैथिल्ये शिथिलताया अभावे बन्धस्य दार्ढ्ये सतीत्यर्थः लघुः गुरुः भवति। बुधैः पण्डितैः पादस्य आदौ पूर्वं प्रायशः चादयः च,वा,हि, आदीनि पादपूरणमात्र प्रयोजनानि न वक्तव्याः लेख्याः। 'प्रायशः' इति कथनेन रे, हे, हन्त, ओम्,प्राः प्रभृतयः पादादावपि न दुष्टाः इति सूचितम्।

शिक्षान्तरम्—

भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश।
अप्यदृश्यां सितां कीर्तिमकीर्तिश्च ततोऽन्यथा॥१८॥

भुवनानीति—भुवनानि जगन्ति त्रीणि, सप्त, चतुर्दश वा निबध्नीयात् वर्णयेत्। स्वर्गमर्त्यपाताल भेदेन त्रीणि, भूर्भुवः स्वर्जनमहस्तपः सत्यलोक भेदेन सप्त, भूर्लोकादिसप्त—तलवितल सुतलपाताल सुतल रसातल तलातल भेदात् चतुर्दश। अदृश्यामपि अमूर्तिमतीमपि कीर्तिं यशः सितां शुभ्रवर्णां वर्णयेत्, अकीर्तिः अयशश्च ततः शुक्लकीर्तेः अन्यथा अन्यरूपी कृष्णामित्यर्थः, वर्णयेत्। तदुक्तं दर्पणे "मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते कीर्त्यां"। इति।

डकारलकारयोश्चाभेदान्न यमकालङ्कारक्षतिः ।

श्लेषालङ्कारे बवयोरभेदमुदाहरति—

त्वत्पादपद्मेण विभोरिपूणाम्
न केवलं संयमिता न बालाः ।
तत्कामिनीभिश्च वियोगिनीभिः
मुहुर्महीपात विधूसराङ्गाः ॥ २२ ॥

त्वयेति—हे विभो स्वामिन् ! त्वत्पादपद्मेण कृपायुक्तेनसता रिपूणां शत्रुणां बालाः बालकाः केवलं न संयमिताः कारागारे न निक्षिप्ता इति न, वियोगिनीभिः पतिवियुक्ताभिः तेषां शत्रुणां कामिनीभिः स्त्रीभिश्च बालाः केशाः न संयमिताः न बद्धाः । पतिविहीनायाःस्त्रियः धर्मशास्त्रानुसार शृङ्गाररचना निषेधात् । कीदृशाः बालकाः केशाश्च । मुहुः पुनः २ मह्यां पृथिव्यां पातेन पतनेन विधूसराणि मलिनानि अङ्गानियेषां अत्र । तथोक्ताः 'बालाः' इति बवयोरभेदः ।

श्लेषेडलयोरैक्यम्—

देवपुष्पयशोराशिस्तोतुमेनंजडात्मकम् ।
उत्कण्ठयति मां भक्तिरिन्दुलेखेव सागरम् ॥ २३ ॥

देव इति—देव स्वामिन् ! भक्तिः श्रद्धाप्रीति पूर्विकासेवा द्विपयिकेत्यर्थः इन्दुलेखा चन्द्रकला जडे जले आत्मा शरीरं यस्य स जडात्मा जडात्मा एव जडात्मकः तं जलस्वरूपमित्यर्थः सागरे समुद्रमिव एनं पुरोवर्तमानं जडः ज्ञानेन शून्यः आत्मा यस्य तादृशं मूर्खमित्यर्थः मां पुण्ययशोराशिं भवत्कीर्तिपुञ्जं स्तोतुं वर्णयितुं उत्कण्ठयति उत्सुकीकरोति । अत्र 'जडात्मकम्' इति डकारलकारयोरैक्यम् ।

निमेरलयोरैक्यम्—

चन्द्रेहितेव द्रुलितस्वरधीतसार-

वारणं शुभ्रमिन्द्रस्य चतुरः सप्त चाम्बुधीन् ।
चतस्रःकीर्तयेद्वाष्टौदश वा ककुभः क्वचित् ॥१९॥

वारणमिति—इन्द्रस्य सुरराजस्य वारणं हस्तिनं शुभ्रं शुक्लं अम्बुधीन् समुद्रान् पूर्व पश्चिम दक्षिणोत्तर समुद्र भेदेन चतुरः,क्षार-क्षीर-दधि-घृत-सुरा-इक्षु-स्वादु जल समुद्रभेदेन सप्त वा, तथा दिशः पूर्व दक्षिण पश्चिमोत्तरभेदेन चतस्रः, पूर्वादिभिः सह विदिशानां योगात् अष्टौ, पूर्वोक्ताष्ट दिशाभिः सह ऊर्ध्वदिशाऽधो दिशासम्मेलनात् दश वा कीर्तयेत् उल्लिखेत् ।

शिक्षान्तरमाह—

यमकश्लेषचित्रेषु ववयोर्डलयोर्नभित् ।
नानुस्वार विसर्गौच चित्र भङ्गायसम्मतौ ॥२०॥

यमकेति—यमकश्लेषचित्रेषु एतन्नामकेषु अलङ्कारविशेषेषु बकारवकारयोः डकारलकारयोः भित् न भेदो न भवति । एवं अनुसार विसर्गौ चित्रस्य न द्वारबन्धादि स्वरूपस्य काव्यविशेषस्य भङ्गाय क्षतये विघातायेतियावत् न सम्मतौ न कथितौ ।

बकारवकारयो डकारलकारयोरभेद मुदाहरति—

शङ्कमानैर्महीपाल ! कारगार विडम्बनम् ।
त्वद्वैरिभिःसपत्नीकैः श्रितं वहु विडम्बनम् ॥२१॥

शङ्कमानैरितिः—हे महीपाल ! पृथ्वीपते ! कारागारेतव बन्धनालये विडम्बनं दुःखं शङ्कमानैः विचारयद्भिः वनाश्रयंविनाऽस्माकं शत्रुकारानिवासतन्यः क्लेशो भविष्यतीति बिभ्यद्भिरित्यर्थः त्वद्वैरिभिः तव शत्रुभिः सपत्नीकैः स्वस्त्रीभिःसह वद्वानिविलानि कीटानां रन्ध्राणि यस्मिन् तत् वनं काननं श्रितं आश्रितम् । अत्र यमकालङ्कारलंकृतपद्ये 'विडम्बनम' 'विलम्बनम' इति बकार वकारयोः

डकारलकारयोश्चाभेदान्न यमकालङ्कारक्षतिः।

श्लेषालङ्कारे बवयोरभेदमुदाहरति—

त्वयादयार्द्रेण विभोरिपूणाम्
न केवलं संयमिता न वालाः।
तत्कामिनीभिश्च वियोगिनीभिः
मुहुर्महीपात विधूसराङ्गाः॥ २२॥

त्वयेति—हे विभो स्वामिन्! त्वया दयार्द्रेण कृपायुक्तेन सता रिपूणां शत्रुणां वालाः बालकाः केवलं न संयमिताः कारागारे न निक्षिप्ता इति न, वियोगिनीभिः पतिवियुक्ताभिः तेषां शत्रुणां कामिनीभिः स्त्रीभिश्च वालाः केशाः न संयमिताः न बद्धा। पतिविहीनायाः स्त्रियः धर्मशास्त्रानुसार शृङ्गाररचना निषेधात्। कीदृशाः बालकाः केशाश्च। मुहुः पुनः २ मह्यां पृथिव्यां पातेन पतनेन विधूसराणि मलिनानि अङ्गानि येषां अत्र। तथोक्ताः 'वालाः' इति बवयोरभेदः।

श्लेषेडलयोरैक्यम्—

देवयुष्मद्यशोराशिस्तोतुमेनंजडात्मकम्।
उत्कण्ठयति मां भक्तिरिन्दुलेखेव सागरम्॥ २३॥

देव इति—देव स्वामिन्! भक्तिः श्रद्धामीति पूर्वैकामेवा द्विपयिकेत्यर्थः इन्दुलेखा चन्द्रकला जडं जलं आत्मा शरीरं यस्य स जडात्मा जडात्मा एव जडात्मकः तं जलस्वरूपमित्यर्थः सागरं समुद्रमिव एनं पुरोवर्तमानं जडः ज्ञानेन शून्यः आत्मा यस्य तादृशं मूर्खमित्यर्थः मां युष्मद्यशोराशिं भवत्कीर्तिपुञ्जं स्तोतुं वर्णयितुं उत्कण्ठयति उत्सुकीकरोति। अत्र 'जडात्मकम्' इति डकारलकारयोरैकता।

चित्रेडलयोरैक्यम्—

चन्देदितंचदुलितस्वरधीतसार-

रत्नासनैरभसकल्पित शोकजातम् ।
पश्यामिपापतिमिरक्षयकारकाय-
मल्पेतरामलतपः कचलोपलोतम् ॥ २४ ॥

चन्द्रेडितमिति—चन्द्रेणईडितं स्तुतं, स्वःस्वर्गेअपीतः मस्पातः माप्तो वा सारः बलं यस्ययेन वा सः स्वरपीतसारः, चञ्चलितं कम्पितं स्वरपीतमारभ्य इन्द्रस्य रत्नासनं रत्नंनिर्मितंसिंहासनयेनतम्, रभसेन अतिवेगेन कल्पितम् [illegible] उत्पादितमिति [illegible] दुःखजातं दुःखपरम्परा दुःखानामिति भावःयेनतम् 'दुःखम' इति [illegible] [illegible] यथा स यतः दुःखानां [illegible] [illegible] गुणानुसारतो । पापम् एव तिमिरं अन्धकारः तस्य क्षयकारः विनाशकः कायः शरीरं यस्यतम, अल्पेतरा बहुदीर्घमितिभावःयत्र अमलं निष्कामं [illegible] निर्मलं तपः तस्मिन् [illegible] [illegible] [illegible] दर्शयामि इति [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] वर्णितः [illegible]

[illegible] [illegible] [illegible]—

अनङ्गस्वर्णनिष्काम ! महाशिव महागम ।
[illegible]नीरे ! देव ! [illegible] ॥२५॥

[illegible]—[illegible] [illegible] [illegible] [illegible] [illegible] हे [illegible] ! [illegible] ! [illegible] [illegible] [illegible] [illegible] [illegible] हे [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] हे [illegible]

निधे हे देव अत्र जगति तव या कान्तिः सर्वे अत्यन्त अद्भुता आश्चर्यजननी वर्तते इति दोषः । अत्र मायवलशब्दस्य यवयोरैक्यमिति न शब्दबन्धविघातः ।

अर्धबन्धचित्रस्योदाहरणान्तरम्—

भवकाननमत्तेभ ! भग्नमायातमः प्रभ ! ।
विनयात् त्वं स्तुवे वीर ! विनत त्रिदशेश्वर ! ॥२६॥

भवेति—भवः संसार एव काननं वनं तस्मिन्मत्तः इभः हस्ती तत्सम्बुद्धौ हे भवकाननमत्तेभ ! भग्नं नाशितं मायारूपं अज्ञानमेव तमः अन्धकारो येन सः भग्नमायातमाः, प्रकृष्टा भा कान्तिः यस्य सः प्रभः भग्नमायातमाश्चासौ प्रभश्च भग्नमायातमःप्रभः तत्सम्बुद्धौ हे भग्नमाया! तमः प्रभ ! विनतः आज्ञानुवर्ती त्रिदशेश्वरः इन्द्रः यस्य तत्सम्बुद्धौ हे वीर विनयात् नम्रतामवलम्ब्य त्वां स्तुवे स्तुतिविषयं करोमि ।

उल्लिखितमेवार्थमुपसंहरति—

आधीत्य शास्त्राण्यभियोगयोगा-
दभ्यासवश्यार्थपदप्रपञ्चः ।
तं तं विदित्वा समयं कवीनां
मनःप्रसत्तौ कवितां विदध्यात् ॥ २७ ॥

अधीत्येति—अभियोगः निरन्तरश्रमः तस्य योगात् वशात् शास्त्राणि न्यायवेदान्तप्रभृतीनि अधीत्य पठित्वा अभ्यासेन नानाशास्त्रानुशीलनेन वश्यः स्वाधीनः अर्थानां वाच्यानां पदानां शब्दानां च प्रपञ्चः समूहः यस्य तथोक्तः सन् कवीनां प्राचीनकाव्यकर्तॄणां तं तं प्रख्यातं समयं सिद्धान्तं विदित्वा ज्ञात्वा मनसः प्रसत्तौ प्रसन्नतायां ज्ञानमालिन्यकार्यचिन्ताभावजनितायां निर्विकल्पतायामिति भावः

सत्यां कवितां काव्यं विदध्यात् कुर्यंति ॥

इति श्रीरुद्रीलवंशद्भव दीगीदत्तीत्तरीदम-
शास्त्रिविरचितायां माद्यमनोरञ्जन्या-
रुयपांव्यरुयायां प्रथमःपरिच्छेदः ।

—:०:—

द्वितीयः परिच्छेदः

अथ काव्य शरीरं दर्शयति—

संस्कृतं प्राकृतं तस्या पभ्रंशो भूतभाषितम् ।
इति भाषाश्चतस्रोपि यान्ति काव्यस्य कायताम् ॥१

संस्कृतमिति–संस्कृतं शास्त्र नियमानुरूपं जातसंस्कारं वा भाषणं, प्राकृतं संस्कृतापभ्रंशरूपम्, तस्य प्राकृतस्य अपभ्रंशः तद्व्याकरणनियमानादरजन्यो विकारः, भूतभाषितम् पिशाच भाषा इति पूर्वोक्ताः चतस्रः भाषाः काव्यस्य कायतां शरीरतां यान्ति उक्ताः चतस्रो भाषा काव्ये प्रयुज्यन्त इत्याशयः ॥

उक्त भाषा चतुष्टयं लक्षयति—

संस्कृतं स्वर्गिणां भाषा शब्द शास्त्रेषु निश्चिता ।
प्राकृतं तज्ज तत्तुल्यदेश्यादिक मनेकधा ॥ २॥

संस्कृत मिति–स्वर्गिणां स्वर्गनिवासिनां देवानामित्यर्थः भाषा संस्कृतं कथ्यते इति ऊह्यम्, सा संस्कृतभाषा शब्दशास्त्रेषु व्याकरणेषु निश्चिता निर्धारिता । प्राकृतं तज्जं तस्मात् संस्कृतात् जातम् उत्पन्नम्, तत्तुल्यं संस्कृत सदृशम्, देश्यम् देशे देशे भवं देश्यं तत्प्रभृति अनेधा अनेक प्रकारक मस्ति ।

अपभ्रंशमाह—

अपभ्रशस्तु यच्छुद्ध तत्तद्देषु भाषितम् ।

अपभ्रंश इति—अन्तदेशेषु पाञ्चालकर्णाटादिषु यत् शुद्धं भाषा न्तरामिश्रितं भाषितम् सोऽपभ्रंशः कथ्यते ।

पिशाच भाषामाह—

यद्भूतैरुच्यते किञ्चित्तद्भौतिक मुदाहृतम् ।३।

यदिति—यत् किञ्चित् भूतैः पिशाचैः उच्यते तत् भौतिकं उदाहृतम् कथितम् ।

सम्प्रति काव्यस्य द्विप्रकारत्व माह—

छन्दोनिबद्धमच्छन्द इति तद्वाङ्मयं द्विधा ।
पद्यमाद्यं तदन्यच्च गद्यं मिश्रं च तद्द्वयम् ॥४॥

छन्द इति—तत् पूर्वोक्तं वाङ्मयं वाणीविकाररूपं काव्यं छन्दो निबद्धं वृत्तबद्धम्, अच्छन्दः वृत्तशून्यम् इति द्विधा द्विप्रकारकं भवति । आद्यं छन्दोबद्धं पद्यं कथ्यते, तदन्यत् छन्दोबद्धादन्यत् वृत्तविवर्जित मितिभावः गद्यं कथ्यते । तद्द्वयम् गद्यपद्यात्मकं काव्यं मिश्रं कथ्यते इति काव्यस्य पुनः त्रयोभेदाः ।

काव्यं दोषशून्यं कर्त्तव्यमित्याह—

अदुष्टमेव तत्कीर्त्यै स्वर्गे सोपानपङ्क्तये ।
परिहार्यानतो दोषां स्तानेवादौ प्रचक्ष्महे ॥५॥

अदुष्टमेवेति—तत् काव्यं अदुष्टम् दोषशून्यम् एव स्वर्गे सोपान पङ्क्तये स्वर्गारोहण स्वरूपायै कीर्त्यै यशसे भवतीति शेषः । अतः अस्मात् कारणात् आदौतान् अलङ्कार शास्त्र प्रसिद्धान् परिहार्यान् परिहर्तुंयोग्यान् त्याज्यानितियावत् दोषान् एव प्रचक्ष्महे ब्रूमः ॥

पददोषानाह—

अनर्थकं श्रुतिकटु व्याहतार्थमलक्षणम् ।

स्वर्मेकेन प्रान्त्मार्गमप्रसिद्धमर्थमतम् ॥ ६ ॥
ग्राम्यं यत्र प्रजायेत पदं तन्न प्रयुज्यते ।
क्वचित् दिष्टा च निर्बुद्धिरेषामप्यदोषता ॥ ७ ॥

अनर्थक मिति–अनर्थकं अर्थशून्यं निरर्थकमनर्थकम्: अर्थात् कष्टकं श्रवणम्, व्याकरणं विरुद्धार्थं प्रतीतिकरम्, अप्रयुक्तम् व्याकरण विरुद्धम्, स्व संकेत मान्त्मार्थम् स्वाभीष्टार्थान्तर संकेतम, अप्रसिद्धम् अर्थ विशेषे यत्र न स्यातम् असंगतम् यस्य अर्थ विशेष बोधकता सर्व सम्मता नास्ति, ग्राम्यस्य ग्राम्यपुरुष वचनैरेव अनुचितस्य यत्र पदं प्रजायते तत् न प्रयुज्यते काव्येषु न लिख्यते । विद्वद्भिः पण्डितैः एषाम् उक्तदोषाणाम्, अदोषता च निर्दोषतापि दृष्टा मानिता।

तदुक्तं साहित्य दर्पणे:–"वक्तरिक्रोध संयुक्ते तथा वाच्ये समुद्धते। रौद्रादौतुरसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् १ सुरतारम्भ गोष्ठयादावश्लीलत्वं तथा पुनः २ स्यातामदोषौ श्लेषादौ निहतार्थ मियुक्तते ३ गुणः स्याद प्रतीतत्वं ज्ञत्वं चेद्वक्तृ वाच्ययोः । स्वयं वापिपरामर्शे ४ कथितं च पदं पुनः । विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि । दैन्ये ऽथलाटानुप्रासेऽनुकम्पायां प्रसादने । अर्थान्तरसं क्रमितवाच्ये हर्षेऽवधारणे ५ संदिग्धत्वं तथा व्याज स्तुति पर्यवसायिचेत् ६ वैयाकरण मुख्ये तु प्रतिपाद्येथ वक्तरि । कष्टत्वं दुःश्रवत्वं वा ७ ग्राम्यत्व मधमोक्तिषु ८ निर्हेतुता तुख्यातेर्थे दोषतां नैव गच्छति ९ कवीनां समयेख्याते गुणः ख्यात विरुद्धता १० उक्तावानन्द मग्नादेः स्यान्न्यून पदता गुणः ११ क्वचिन्नदोषो न गुणः १२ गुणः क्वाप्यधिकं पदम् १३ गर्भितत्वं गुणः क्वापि १४ पतत्प्रकर्षता तथा १५ क्वचिदुक्ता स्वशब्देन न दोषो व्यभिचारिणः १६

अनुभावविभावाभ्यां रचना यत्नतो विनाप्यथ सत्यावादिवे
रप साध्यत्वेन यतो गुणः, १७ विरोधिनोऽपि स्मरणे साम्येन व
पि वा परोद्देशेऽपि नान्योन्य मर्दिन्यपद्गन्त पासयोः, १८ अन
प गर्वेषां दोषाणां नैव दोषता, १९ अन्येषामपि दोषाणां मि
पितान्दर्शीपिभिः अदोषताय गुणता ज्ञेया चानुभयात्मता २०”

अनर्थकस्य लक्षणोदाहरणे ।

प्रस्तुते नुपयुक्तं यत्तदनर्थक मुच्यते ।
यथा विनायकं वन्दे लम्बोदरमहं हि तु ॥ ८ ॥

प्रस्तुत इति—प्रस्तुते प्रकृते अर्थे यत् अनुपयुक्त उपयो
गरहितम् भवति तत् अनर्थकम् उच्यते । यथा अहं लम्बो
विनायकं गणेशं वन्दे नमस्करोमि । अत्र 'लम्बोदरम्' इति
विनापि अभीष्टार्थलाभात् 'लम्बोदरम्' इति अनर्थकम् ।

अथ श्रुतिकटु—

निष्ठुराक्षरमत्यन्तं बुधैः श्रुतिकटु स्मृतम् ।
एकाग्रमनसा मन्ये स्रष्ट्रेयं निर्मिता यथा ॥ ९ ॥

निष्ठुरेति—अत्यन्तं निष्ठुराणि क्लिष्टोच्चारणानि अक्षरा
यस्य तत् बुधैः पण्डितैः श्रुतिकटु स्मृतम् कथितम् । यथा—
धी स्रष्ट्रा ब्रह्मणा एकाग्रमनसा सावधान मनसा निर्मिता रचि
इति मन्ये तर्कयामि । अत्र 'स्रष्ट्रा' क्लिष्टोच्चारणतया श्रुतिकटु

अथ व्याहतार्थता—

व्याहतार्थं यदिष्टार्थबाधकार्थान्तराश्रयम् ।
रतस्त्वमेव भूपाल भूतलोपकृतौ यथा ॥ १० ॥

व्याहतार्थमिति—यत् इष्टस्य अभिप्रेतस्य अर्थस्य वाच्य
बाधकम् अवरोधकम् अर्थान्तरम् अन्यमर्थं आश्रयति अवलम्ब

इति तथाभूतमस्ति तत् व्याहतार्थम् कथ्यते। यथा हे भूपाल ! हे पृथिवीपते! त्वमेव नान्यः इतिभावः भूतलस्य जगतः उपकृतिः उपकारः तस्यां रतः तत्परः असि। अत्र 'भूतलोपकृतौ' इति पदं 'भूतानां प्राणिनां लोपस्य नाशस्य कृतौ करणे' इत्यन्यार्थमाश्रयतीति व्याहतार्थम्।

अथालक्षणम्—

शब्दशास्त्र विरुद्धं यत्तदलक्षणमुच्यते ।
मानिनी मानदलनो यथेन्दुर्विजयत्यसौ ॥ ११ ॥

शब्देति—यत् पदं शब्दशास्त्रस्य व्याकरणस्य विरुद्धम् अननुगुणम् तत् अलक्षणम् उच्यते। यथा—मानिनीनाम् युवतीनाम् मानस्य अभिमानस्य प्रति विनाशकत्वेन दलयतीति भावः दलनः विनाशकः इन्दुः चन्द्रः विजयति सर्वोत्कर्षेण वर्तते। अत्र विपूर्वकात् जि धातोः "विपराभ्यां जेः" इत्यात्मने पदानुशासनात् "विजयति" इति परस्मैपदं न साधु।

स्वसंकेतप्रक्लृप्तार्थमाह—

स्वसंकेतप्रक्लृप्तार्थं नेयार्थान्तर मानकम् ।
यथा विभाति शीतांशु पुष्पितैर्वानरध्वजैः ॥१२॥

स्वसंकेतेति—यत् पदं नेयस्य ऊह्यस्य न तु अभिधाशक्ति-र्वाच्यस्यैव भावः अर्थान्तरस्य अन्यार्थस्य ज्ञापकम् अभिधायकम् तत् स्वसंकेत प्रक्लृप्तार्थं कथ्यते। यथा—अयं शीतांशु पुष्पितैः पुष्पाणि सजातानि येषाम् इति पुष्पिताः तैः पुष्पितैः पुष्पयुक्तैः [illegible] अर्जुन वृक्षैः विभाति शोभते।

अथ क्लिष्टम्—

[illegible]

राजेन्द्र ! भवतः कीर्तिश्चतुरो हन्ति वारिधीन्॥१३॥

यदेति–यस्य पदस्य प्रसिद्धिः अर्थविशेष बोधने ख्यातिः नास्ति, तत् पदम् अप्रसिद्धम् विदुः जानन्ति पण्डिताः इति शेषः। यथा–हे राजेन्द्र ! हे नृपेन्द्र ! भवतः कीर्तिः यशः चतुरः वारिधीन् समुद्रान् हन्ति गच्छति। अत्र 'हन् धातुः' धातुपाठे "हन् हिंसागत्योः" इति पठित गमनार्थवाचकोऽपि न क्वापि गमनार्थे प्रसिद्धः इति अप्रसिद्धम्।

असंमतमाह—

शक्तमप्यर्थमाख्यातुं यन्न सर्वत्र संमतम्।
असंमतं तमोम्भोजं क्षालयन्त्यंशवो रवेः ॥१४॥

शक्तमिति–यत् पदं अर्थम् अर्थविशेषम् आख्यातुम् वक्तुम् शक्तमपि समर्थमपि सर्वत्र सर्वेषु काव्येषु न संमतम् नाभिमतम्, यस्य अन्य कविकृत काव्येषु अर्थविशेष बोधकता नेष्टा इति भावः, तत् असंमतम् कथ्यते। यथा–रवेः सूर्यस्य अंशवः किरणाः तमोम्भोजम् अन्धकाररूपम् अम्भोजम् पङ्कम् क्षालयन्ति दूरीकुर्वन्ति। अत्र 'अम्भोज' शब्दः अम्भसः जातः इति व्युत्पत्ति कारणेन 'पङ्क' रूपमर्थमभिधातुं शक्तोऽपि कविभिः कमलादन्यस्मिन् अर्थे नाभिमतः इति कर्दमार्थे प्रयुक्तः असंमतदोषं जनयति।

ग्राम्यदोषमाह—

यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा।
छादयित्वा सुरान् पुष्पैः पुरो धान्यं क्षिपाम्यहम्॥१५॥

यदिति–यत् पदं यत्र यस्मिन् देशे यस्यां भाषायां वा अनुचितं वक्तुं न युक्तम्, तत् पदम् तत्र तस्मिन् देशे तस्यां भाषायाम् वा ग्राम्यम् स्मृतम् कथितम्। यथा–अहम् सुरान्

देवान् पुष्पैः द्रादयित्वा पिधाय पुष्पैः अग्रतः धान्यं क्षिपामि। अत्र 'द्रादयित्वा' 'धान्यम्' 'क्षिपामि' इति पदत्रयस्य ग्रामीणपुरुषप्रयुक्तपदवत् अयुक्तमिति ग्राम्यम्। 'पुष्पैः पूजयित्वा बलिमुपहरामि' इति कथनेन तु वोक्तदोषा।

वाक्यदोषानाह—

पदात्मकत्वाद्वाक्यस्य तद्दोषाः सन्ति तत्र हि।
अपदस्थास्तु ये वाक्ये दोषास्तान् ब्रूमहेऽधुना ॥१६॥

पदात्मकत्वादिति—वाक्यस्य पदसमूहस्य पदात्मकत्वात् पदरूपत्वात् तद्दोषाः पददोषाः तत्र वाक्ये सन्ति। वाक्यस्य पदसमुदायरूपत्वेन एकपदगतो दोषः पदं दूषयन् वाक्यमपि दूषयतीति पददोषः वाक्यदोष एवेति भावः। अधुना सम्प्रति वाक्ये ये अपदस्थाः पदे अवर्तमानाः दोषाः सन्ति तान् ब्रूमहे कथयामः। अनेन वाक्यदोषाणां 'पदाश्रिताः' 'वाक्यमात्राश्रिताः' चेति द्वैविध्यं सूचितम्॥

खण्डितं व्यस्तसंबन्धमसंमितमपक्रमम्।
छन्दोरीति यतिभ्रष्टं दुष्टं वाक्यमसत्क्रियम् ॥१७॥

खण्डितमिति—१ खण्डितम्, २ व्यस्तसम्बन्धम्, ३ असंमितम्, ४ अपक्रमम्, ५ छन्दोभ्रष्टम्, ६ रीतिभ्रष्टम्, ७ यतिभ्रष्टम्, ८ असत्क्रियम् वाक्यं दुष्टम् सदोषम् भवति।

खण्डितम्—

वाक्यान्तरप्रवेशेन विच्छिन्नं खण्डितं मतम्।
यथा पातु सदा स्वामी स गिरीशः स्तौति यो निजः॥१८॥

खण्डितमिति—यत्र वाक्यस्य वाक्यान्तरस्य अन्यवाक्यस्य प्रवेशेन मध्ये अतिविशेषेण विच्छिन्नम् त्रुटितम् तत् खण्डितम् मतम्

कथितम् । यथा—स्वामी स्तकः सः जिनः शुद्धः वः युष्मान् पातु यस्तु यं जिनं इन्द्रः स्तौति । अत्र 'पातु सदा स्वामी वो जिनः' इति वाक्यम् 'यमिन्द्रः स्तौति' इत्यन्यवाक्यस्य मध्ये प्रवेशेन गुम्फितमिति गर्भितम् ।

व्यस्तसम्बन्धम्—

सम्बन्धिपददूरत्वे व्यस्तसम्बन्धमुच्यते ।
यथाप्तः संपदं ज्ञाता देयात्तत्त्वानि वोऽर्हताम् ॥ १९ ॥

सम्बन्धीति—सम्बन्धिनाम् परस्परम् अन्वितानां पदानाम् दूरत्वे असामीप्ये सति व्यस्तसम्बन्धम् उच्यते । यथा—अर्हताम् जिनसम्प्रदायविशेषावलम्बिनाम् आप्तः मुख्यः तत्त्वानि ज्ञाता याथार्थ्यवित् ऋषभदेव इति ऊह्यम् वः युष्माकम् सम्पदम् सम्पत्तिम् देयात् । अत्र 'आप्तः' 'अर्हताम्' इत्यनयोः 'ज्ञाता तत्त्वानि' इत्येतयोश्च पदयोः सम्बन्धः पदान्तरव्यवहितत्वेन त्रुटितः इति व्यस्तसम्बन्धम् ॥

असंमितम्—

शब्दार्थौ यत्र न तुलाविधृताविव संमितौ ।
तदसंमितमित्याहुर्वाक्यं वाक्यविदो यथा ॥ २० ॥

शब्दार्थाविति—यत्र यस्मिन् वाक्ये शब्दार्थौ तुलायां मानयन्त्रविशेषे विधृतौ स्थापितौ इव, तुलानिर्णीतसमपरिमाणताक वस्तुद्वयवत् यौ न संमितौ तुल्यौ न भवतः तत् वाक्यम् वाक्यविदः विद्वांसः 'असंमितम्' इति आहुः । यत्र शब्दा बहवः अर्थाः अल्पाः तत्र असंमितदोषः भवति इति स्पष्टोऽर्थः ।

तदुदाहरणम्—

मानसौकः पतद्यानदेवासन विलोचनः ।

तमोरिपु विपक्षारि प्रियां दिशतु वो जिनः ॥२१॥

मानसेति—मानसे तन्नामके सरसि ओकःस्थानम् यस्य तथाभूतः यः पतन् पक्षी हंसः तदेव यानं वाहनम् यस्य तादृशः यः देवः ब्रह्मा तस्य आसनम् कमलम् तदिव लोचने नेत्रे यस्य सः कमललोचनः इत्यर्थः जिनः बुद्धः वः युष्माकम् तमसः अन्धकारस्य रिपुः नाशकः सूर्यः तस्य विपक्षः राहुः तस्य अरिः शत्रुः विष्णुरित्यर्थः तस्य प्रिया लक्ष्मीः ताम् दिशतु ददातु । अत्र 'कमलनेत्रः श्रीजिनः श्रियं ददातु' इति अर्थः शब्दापेक्षया अतीवस्वल्पः इति शब्दार्थयोः अतुल्यत्वात् अपमितम् ।

अपक्रमम्—

अपक्रमं भवेद्यत्र प्रसिद्धक्रमलङ्घनम् ।
यथा भुक्त्वा कृतस्नानो गुरून्देवांश्च वन्दते ॥२२॥

अपक्रममिति—यत्र यस्मिन् वाक्ये प्रसिद्धस्य शास्त्रादौ ख्यातस्य क्रमस्य लङ्घनम् भवेत् तत् अपक्रमम् कथ्यते । यथा भुक्त्वा भोजनम् कृत्वा कृतम् स्नानम् येन सः तादृशः गुरून् देवान् च वन्दते नमस्करोति । अत्र 'पूर्वं स्नानं ततो देववन्दनम् ततो गुरुवन्दनम् तदनन्तरं भोजनम्' इति क्रमस्य लङ्घनात् अपक्रमम् ।

छन्दोभ्रष्टम्—

छन्दो शास्त्र विरुद्धं यच्छन्दोभ्रष्टं हि तद्यथा ।
स जयति जिनपतिः परब्रह्ममहानिधिः ॥ २३ ॥

छन्द इति—यत्र वाक्यम् छन्दः शास्त्रस्य विरुद्धम् अननुकूलम् भवति तत् छन्दोभ्रष्टम् भवति । यथा—परस्य उत्कृष्टस्य ब्रह्मणः मनसाज्ञानस्येत्यर्थः महानिधिः निलयः सः प्रसिद्धः जिनः

बुद्धः जयति । अत्र 'न' इत्याद्याक्षरे गणस्य 'जयति' इति जगणस्य न्यासात् 'वक्त्रं नाद्यान्नसौ स्याताम्' इत्याद्यनुष्टुब्लक्षणव्याघात-नात् छन्दोभ्रष्टम् ।

रीतिभ्रष्टम्—

रीतिभ्रष्टमनिर्वाहो यत्ररीतेर्भवेद्यथा ।
जिनो जयति स श्रीमानिन्द्राद्यमरवन्दितः ॥२४॥

रीतिभ्रष्टमिति—यत्र यस्मिन् वाक्ये रीतेः गौडी वैदर्भ्यादेः अनिर्वाहः निर्वहणम् न भवेत् अनियतरीत्यन्तरेण खण्डितत्वादिति भावः, तत् रीतिभ्रष्टम् कथ्यते । यथा—इन्द्रादिभिः सुरेन्द्रप्रभृतिभिः अमरैः देवैः वन्दितः नुतः श्रीमान् शोभासम्पन्नः सः जिनः बुद्धः जयति । अत्र प्रथमे पादे पदानां समास शून्यत्वेन "असमस्तपदावली" इति वक्ष्यमाणलक्षणा वैदर्भी रीतिः, द्वितीये पादे तु तथा स तद्भावात् "एका भूयः समासात्स्यात्" इत्युक्तलक्षणा गौडीया रीतिः । कविभिः आदौ अन्ते च एका एव रीतिः प्रयुज्यते, अत्र तु न तथा इति रीतिभ्रष्टम् ।

यतिभ्रष्टम्—

पदान्तर्विरतिः प्रोक्ता यतिभ्रष्टमिदं यथा ।
नमस्तस्मै जिनस्वामिने सदा नेमयेऽर्हते ॥ २५ ॥

पदान्तरिति—पदस्य सुप्तिङन्तात्मकस्य अन्तः मध्ये विरतिः विरामः यतिभ्रष्टम् प्रोक्ता । यथा—जिनः बुद्धः स्वामी अवलम्बनम् यस्य तस्मै, अर्हते तन्नामक सम्प्रदायविशेष प्रवर्तकाय नेमये तन्नाम्ने पुरुषविशेषाय सदा नमः । अत्र पूर्वार्द्धस्य 'स्वामिने' इति पदस्य मध्ये 'मि' इत्यत्र एव विरतिः अतः यतिभ्रष्टम् ।

असत्क्रियम्—

क्रियापद विहीनं यत्तदसत्क्रियमुच्यते ।
यथा सरस्वतीं पुष्पैः श्रीखण्डैर्घुसृणैः स्तवैः ॥ २६ ॥

क्रियापदेति–यद् वाक्यम् क्रियापदेन विहीनम् रहितम् भवति तद् असत्क्रियम् उच्यते । यथा–सरस्वतीम् वाग्देवताम् पुष्पैः पूजयामि, श्रीखण्डैः चन्दनैः घुसृणैः कुंकुमैः सुलिम्पामि स्तवैः मार्थयामि । अत्र 'पूजयामि' इत्यादीनाम् क्रियापदानाम् अभावात् असत्क्रियम् ।

सम्प्रति अर्थदोषानाह—

देशकालागमावस्था द्रव्यादिषु विरोधिनम् ।
काव्येष्वर्थं न बध्नीयाद्विशिष्टं कारणं विना ॥२७॥

देशेति–देशः कर्णाटादिः कालः वसन्तप्रभृतिः आगमः शास्त्रम् अवस्था दशा द्रव्यम् पृथिव्यादि आदिशब्देन रीतिप्रकृत्यादीनां ग्रहणम् तेषु विरोधिनम् विपरीतम् अर्थम् विशिष्टम् असामान्यम् कारणम् विना काव्येषु न बध्नीयात् न रचयेत् ।

उदाहरति—

प्रवेशे चैत्रस्य स्फुट कुटज राजिस्मितदिशि,
प्रचण्डे मार्तण्डे हिमकणसमानोष्म महसि ।
जलक्रीडायातुं मरुसरसि बाल द्विपकुले,
मदेनान्धं विध्यन्त्यसम शरपातैः प्रशमिनः ॥२८॥

प्रवेश इति–स्फुटा पुष्पिता कुटजानाम् तदाख्यवृक्षविशेषाणाम् राजिः पङ्क्तिः सा एव स्मितम् ईषद्धासः यासाम् तादृशादिशः यत्र तस्मिन् चैत्रस्य मधुनाम्नो मासस्य प्रवेशे आरम्भे, हिमकणसमानम् तुषारबिन्दुवत् शीतलमित्यर्थः ऊष्ममहः उष्णातेजः यस्य

तस्मिन् मार्तण्डे सूर्ये प्रचण्डे सति तीक्ष्ण किरणे सति मदाविनः शालिनः सेवाशीलाः । ये पुरुषा [illegible] निर्जलः देशः विशेषः तस्य यद् सरः तस्मिन् जलक्रीडायै आयानाम् आगतम् मदेन अन्धम् अत्युन्मत्ततया किञ्चिदपि न पश्यन्तम् बालाः अप्राप्तयौवनाः ये द्विपाः हस्तिनः तेषाम् कुलम् समूहम् मदान्ध- [illegible]

[illegible] वर्षाकाले एव उत्पत्तिः । तेजोमयमूर्तिः सूर्यः हिमवत् शीतलः इति दृष्टविरुद्धम् । यौवनमभ्यस्य हस्तिनामेव मदान्धता ननु शास्त्र- सिद्धम्, अत्र तु बालहस्तिनामेव मदान्धत्वम् उक्तम् इति अवस्थाविरुद्धम् । निर्जले मरुदेशे सरः सद्भावः इति देश विरुद्धम् । समाशीलाः (मदाविनः) विश्वन्ति इति आगमविरुद्धम् ।

इति दोषविषनिषेककलङ्कितं सुज्ज्वलं सदा विद्वद्भिः ।
कविहृदयसागरोत्थितं ममृतं मिवास्वाद्यते काव्यम् ॥

इतीति–विबुधैः पण्डितैः इति उक्तप्रकारः [illegible] एव विषाणि तेषाम् निषेकाः सम्पाताः तैः [illegible] अकलङ्कितम् अदूषितम्, उज्ज्वलम् [illegible] कवेः हृदयम् एव सागरः [illegible] काव्यम् अमृतम् इव आस्वाद्यते [illegible] । [illegible] विबुधैः [illegible] अमृतम् इव विबुधैः पण्डितैः काव्यम् [illegible] । शेषं पूर्ववत् ।

इति श्रीमद्रोहदेवशोद्भव, [illegible] [illegible] विरचितायां [illegible] व्याख्यायां [illegible]

तीर्थे [illegible]
पदैः

तृतीयः परिच्छेदः

काव्ये गुणानामुपयोगमाह—

अदोषावपि शब्दार्थौ प्रशस्येते न यैर्विना ।
तानिदानीं यथाशक्ति ब्रूमोऽभिव्यक्तये गुणान् ॥१॥

अदोषाविति—यैः गुणैः विना अदोषौ अपि पूर्वोक्त सकल दोषशून्यौ अपि शब्दार्थौ न प्रशस्येते, प्रशंसनीयौ न भवतः इदानीं तान् गुणान् यथाशक्ति शक्त्यनुसारेण अभिव्यक्तये परिस्फुटत्वाय ब्रूमः वदामः ।

के ते इत्याह—

औदार्यं समता कान्तिरर्थव्यक्तिः प्रसन्नता ।
समाधिः श्लेष ओजोऽथ माधुर्यं सुकुमारता ॥ २ ॥

औदार्यमिति—१ औदार्यम्, २ समता, ३ कान्तिः, ४ अर्थव्यक्तिः, ५ प्रसन्नता, ६ समाधिः, ७ श्लेषः, ८ ओजः, ९ माधुर्यम्, १० सुकुमारता इति एते गुणाः दश सन्ति ।

औदार्यस्य लक्षणम् —

पदानामर्थचारुत्वप्रत्यायकपदान्तरैः ।
मिलितानां यदाधानं तदौदार्यं स्मृतं यथा ॥ ३ ॥

पदानामिति—अर्थस्य वाच्यस्य वर्णनीयस्य चारुत्वं सौन्दर्यं तस्य प्रत्यायकानि बोधकानि पदान्तराणि ... तैः सह मिलितानां संयुक्तानां पदानां यत् आधानं ... तत् औदार्यं स्मृतं कथितम् ।

उदाहरणम्—

गन्धेभ विभ्राजितधाम लक्ष्मी-
लीलाम्बुजच्छत्रमपास्य राज्यम् ।
क्रीडागिरौ रैवतके तपांसि
श्रीनेमिनाथोत्र चिरंचकार ॥४॥

गन्धेभेति—श्रीनेमिनाथः श्रीयुतः नेमिनामकः प्रभुः गन्धेभाः गन्धहस्तिनः तैः विभ्राजितम् विराजितम् धाम भवनम् यस्मिन् तत्, लक्ष्मीः विष्णुपत्नी तस्याः लीलाम्बुजम् क्रीडार्थं कमलम् तदिव छत्रम् यस्मिन् तत् लक्ष्मीलीलाकमलं कमनीयच्छत्रशोभि-तमित्यर्थः राज्यम् अपास्य त्यक्त्वा क्रीडागिरौ खेलोपयोगिनि पर्वते अत्र अस्मिन् रैवतके तन्नाम्नि पर्वतविशेषे चिरम् दीर्घ-कालपर्यन्तम् तपांसि चकार। अत्र एकाकी 'इभ शब्दः' न तादृशीम् अर्थमनोहरताम् जनयति यादृशीं स 'गन्ध' शब्देन संमिलितः सन् जनयति; एकाकी 'अम्बुज' शब्दः तम् अर्थं चमत्कारम् न उत्पादयति यम् स 'लीला' शब्देन युक्तः सन् करोति; एवम् केवलो 'गिरि' शब्दः न तादृशं वैचित्र्यम् आवहति यादृशं स 'क्रीडा' शब्देन अन्वितः सन् विदधाति इति इभाम्बुजगिरि शब्दानां क्रमेण रमणीयताप्रतिपादकैः गन्धलीलाक्रीडाशब्दैः सह संमिलितानाम् आधानात् औदार्यम्।

समतां कान्तिं च लक्षयति—

बन्धस्य यद्वैषम्यं समता सोच्यते बुधैः ।
यदुज्ज्वलत्वं तस्यैव साकान्तिरुदितायथा ॥ ५ ॥

बन्धस्येति—बन्धस्य सन्दर्भस्य यत् अवैषम्यम् विषमताऽभावः समगुणवर्ण विशिष्टत्वेन समानता इति भावः सा बुधैः पण्डितैः

समता उच्यते । तस्यैव बन्धस्यैव यत्र उज्ज्वलम् बन्धचारुत्वचौर विसन्धि विसर्गलोपाद्यभावेन दीप्तिमत्त्वम् सा कान्तिः तन्नामकः गुणः उदिता कथिता ।

समतामुदाहरति—

कुचकलशे विसारिस्फारलावण्यधारा-
मनुवदति यदङ्गा सङ्गिनी हारवल्लिः ।
असदृश महिमानं तामनन्योपमेयाम्
कथय कथमहं ते चेतसि व्यञ्जयामि ॥ ६ ॥

कुचेति—यस्याः अङ्गा सङ्गिनी अङ्गगता हारवल्लिः हाररूपा लता कुचकलशयोः स्तनरूपकुम्भयोः विसारिणी प्रसरणशीला स्फारा स्फीता दीर्घेति यावत् या लावण्यस्य "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिति स्मृतम्" इत्युक्तस्वरूपस्य कान्तिविशेषस्य धारा प्रवाहिः ताम् अनुवदति अनुकरोति, असदृश महिमानम् असाधारण गुण प्रभावाम् अनन्योपमेयाम् अन्याभिः स्त्रीभिः उपमातुम् समीकर्तुम् अयाम्, ताम् सरहसंसताम् प्रियम् अहम् ते चेतसि हृदये कथम् केन प्रकारेण व्यञ्जयामि प्राकटीकरोमि । यत्र केषाञ्चित् पदानां माधुर्यम् केषाञ्चित् श्रुतिकटुत्वम् तत्र बन्धस्य वैषम्य । अत्र तु सर्वाण्येव पदानि सर्वासां मधुरतां प्रकटयन्तीति

कान्तिमुदाहरति—

कृताहारः प्रथममपि निर्गत्य सदना-
दनासक्तः सौख्ये क्वचिदपि पुरा जन्मनि कृती ।

तपस्यन्नश्रान्तं ननु वनभुवि श्रीफलदलै-
रखण्डैः खण्डेन्दोश्चिरमकृत पादार्चनमसौ ॥७॥

फलैरिति—कृतीधन्यः असौ पुरुषः पुरा जन्मनि पूर्वजन्मनि प्रथममपि बाल्यावस्थायामेव सद्मनात् गृहात् निर्गत्य बाहिर् गत्वा गृहस्थाश्रमम् त्यक्त्वा इति भावः फलैः कृतः रचितः कृतः इति यावत् आहारः भोजनम् येन तादृशः क्वचिदपि कस्मिंश्चिदपि सौख्ये सुखसाधके वस्तुनि अनासक्तः आसक्तिं न कुर्वन्, अश्रान्तम् अगणितश्रमम् यथा भवति तथा तपस्यन् तपः कुर्वन्, ननु निःसन्देहम् वनभुवि वनप्रदेशे अखण्डैः अभग्नैः श्रीफलस्य बिल्ववृक्षस्य दलैः पत्रैः खण्डेन्दोः शिवस्य पादयोः चरणयोः अर्चनम् पूजनम् चिरम् दीर्घकालपर्यन्तम् अकृत कृतवान्। अत्र 'फलैः' 'कृताहारः' इत्यादिस्थलेषु विसर्गलोपो नास्ति। 'निर्गत्य' इत्यादिस्थलेषु संयुक्तस्य 'त्य' इत्यस्य बलेन 'ग' इत्यस्य 'नि'गुरुत्वम्, तथा संयुक्तस्य 'र्ग' इत्यस्य सामर्थ्येन ह्रस्वस्य 'नि' इत्यस्य गुरुत्वम्, 'तपस्यन्नश्रान्तम्' 'खण्डेन्दोश्चिरम्' इत्यादि सन्धयश्च न विरूपाः इति प्रथमपरिच्छेदोक्त सम्पूर्णबन्ध चारुत्वसाधकानां सद्भावात् बन्धस्य उज्ज्वलत्वमस्तीति कान्तिगुणः समुद्भवति।

अर्थव्यक्तिः—

यदनेयत्वमर्थस्य सार्थव्यक्तिः स्मृता यथा।
त्वत्सैन्यरजसा सूर्ये लुप्ते रात्रिरभूद्दिवा ॥ ८ ॥

यदिति—यत् अर्थस्य वर्णनीयस्य वस्तुनः अनेयत्वम् नेयत्वम् अभिधाव्यतिरिक्तवृत्त्या बोध्यत्वम्, न नेयत्वम्, अनेयत्वम् सुखेन ज्ञेयत्वम् सा अर्थव्यक्तिः स्मृता कथिता। यथा—हे राजन्! तव सैन्यस्य सेनायाः रजसा पादाघातसमुत्थितधूल्या सूर्ये लुप्ते

आच्छादिते सति दिवा दिवसे अपि रात्रिः अभूत्। अत्र रात्रेः कारणम् सूर्यलोपः सूर्यलोपस्य कारणम् रजः रजसः कारणम् सैन्यम् इत्यर्थबोधे न कापि क्लिष्टता इति अर्थव्यक्तिः।

प्रसत्तिः—

झटित्यर्थार्पकत्वं यत्प्रसत्तिः सोच्यते बुधैः।
कल्पद्रुम इवाभाति वाञ्छितार्थप्रदो जिनः॥ ९॥

झटितीति—यत् झटिति अविलम्बेन पठनश्रवणसमकालम् एवेति भावः अर्थार्पकत्वम् अर्थसमर्पकत्वम् सा बुधैः पण्डितैः प्रसत्तिः उच्यते। यथा—वाञ्छितार्थप्रदः अभीष्टदः जिनः कल्पद्रुमः इव कल्पवृक्षः इव आभाति शोभते। अत्र सद्यः अर्थस्य प्रतीति भवतीति प्रसत्तिः।

समाधि—

स समाधिर्यदन्यस्य गुणोऽन्यत्र निवेश्यते।
यथाश्रुभिररिस्त्रीणां राज्ञः पल्लवितं यशः॥ १०॥

स इति—यत् अन्यस्य वस्तुनः गुणः धर्मः अन्यत्र अन्यस्मिन् वस्तुनि निवेश्यते समर्प्यते स समाधिगुणभवति। यथा अरिस्त्रीणाम् शत्रुपत्नीनाम् अश्रुभिः पतिमरणशोकजन्यैः नेत्रजलैः राज्ञः यशः कीर्तिः पल्लवितम् संजातपत्रम् अस्ति वृद्धिं गतमिति भावः। अत्र लताद्यसाधारणधर्मः पल्लवितत्वं यशसि समारोपितः इति समाधि।

श्लेषौजोगुणौ लक्षयति—

श्लेषो यत्र पदानि स्युःस्यूतानीव परस्परम्।
ओजः समासभूयस्त्वं तद्द्वयेष्वतिसुन्दरम्॥ ११॥

श्लेष इति—यत्र यस्मिन् बन्धे पदानि शब्दाः परस्परम् मिथः स्यूतानीव सम्मिलितानीव एकसूत्र प्रोतमणिवत् संश्लिष्टानि

इत्यर्थं भवन्ति तत्र श्लेषः गुणः भवति । समासभूयस्त्वम् बहुसमासशालित्वम् ओजः भवति । यत्र समासाधिक्यं भवति तत्र ओजो गुणः भवतीति स्पष्टोऽर्थः । तत्र ओजः गद्येषु गद्यकाव्येषु अतिसुन्दरम् अतिरमणीयम् भवति ।

श्लेषोदाहरणम्—

मुदा यस्योद्गीतं सह सहचरीभिर्वनचरैः
मुहुः श्रुत्वा हेलोद्धृतधरणिभारं भुजबलम् ।
दरोद्गच्छद्दर्भाङ्कुर निकरदम्भात्पुलकिताः
चमत्कारोद्रेकं कुलशिखरिणस्तेपि दधिरे ॥१२॥

मुदेति—ते मौलिद्धाः कुलशिखरिणः "महेन्द्रो मलयः सह्यः शुक्तिमान् पारियात्रकः । विन्ध्यो हिमगिरिश्चैव सप्तैते कुलपर्वताः" इत्युक्तनामानः कुलपर्वताः अपि वनचरैः भिल्लैः सहचरीभिः स्त्रीभिः सह मुदा आनन्देन सह उद्गीतम् उच्चैः गीतम् स्तुतम् हेलया लीलया अनायासेनेति भावः उद्धृतः दूरीकृतः धरणेः पृथिव्याः भारः दुष्टराजसमुदायरूपः येन तस्य यस्य नृपस्य भुजयोः बाह्वोः बलम् पराक्रमम् मुहुः पुनः पुनः श्रुत्वा दरोद्गच्छन्तः ईषत् निर्गच्छन्तः ये दर्भस्य कुशस्य अङ्कुराः तेषां निकरस्य समूहस्य दम्भात् व्याजात् पुलकिताः जातरोमाञ्चाः सन्तः चमत्कारोद्रेकम् आश्चर्यातिशयम् दधिरे दधुः । अत्र सर्वाण्येव पदानि शब्दतीलिङ्गिनस्त्यादिचक्रपादयोपने एकसूत्रनिबद्धमणय इव स्यूतानि प्रतिभान्तीति श्लेषः ।

गद्येन ओजोगुणमुदाहरति—

समराजिर स्फुरदरिनरेश करिनिकर शिरः सरस ।
सिन्दूर पूरपरिचयेनेवारुणितकरतलो देवः ॥१३॥

समरेति—हे देव ! समराजिरे युद्धक्षेत्ररूपाङ्गणे स्फुरन् राजमानः यः अरिनरेशानाम् शत्रुभूपतीनाम् करिनिकरः हस्तिसमूहः तस्य शिरःसु ये सरसाः आर्द्राः ये सिन्दूराः पूराः सिन्दूरकल्पाः तेषां परिचयेन संसर्गेण इव अरुणितम् रक्तीकृतम् करतलम् यस्य तादृशः असि त्वम् इति शेषः । अत्र समासस्य बाहुल्यम् इति ओजोगुणः ।

माधुर्यसौकुमार्ययोर्लक्षणे—

सरसार्थपदत्वं यत्तन्माधुर्यमुदाहृतम् ।
अनिष्ठुराक्षरत्वं यत्सौकुमार्यमिदं यथा ॥ १४ ॥

सरसेति—यत् सरसः रसविशिष्टः अर्थः अस्ति येषु तादृशानि पदानि यत्र तस्य भावः तत्त्वम् रसाभिव्यञ्जकशब्द विशिष्टत्वम् इत्यर्थः तत् माधुर्यम् उदाहृतम् कथितम् । यत् अनिष्ठुराक्षरत्वम् परुषवर्णयुक्तत्वम् तत् सौकुमार्यम् कथितम् ।

माधुर्योदाहरणम्—

फणमणि किरणालीस्यूतवक्षोनिचोलः
कुचकलशनिधानस्येव रक्षाधिकारी ।
उरसि विशदहारस्फारता मुज्जिहानः
किमिति कामराज कुण्डली कुण्डलिन्याः ॥१५॥

फणेति—फणे यः मणिः तस्य किरणाल्या किरणसमूहेन स्यूतः संश्लिष्टः अतएव कान्तियुक्तः निचोलः कञ्चुकः यस्य तादृशः कुचकलशौ स्तनकुम्भौ एव निधानम् निधिः तस्य रक्षाधिकारी इव रक्षार्थं नियुक्त इव रक्षां कर्तुम् आदिष्टः इति भावः, उरसि वक्षःस्थले स्थितः इति भावः विशदस्य स्वच्छस्य हारस्य स्फारताम् दैर्घ्यम् उज्जिहानः कुण्डली सर्पः किमिति

कुण्डली सर्पः कुण्डलितः पाशः कुण्डलमूर्तिमता भुजगाः इति शेषः कामपरांशेष्वेतयदं किंचिति किमपि एवं इति शेषः स्तनमण्ड-लरूपकोपवाराणां निपुणस्य मदस्य इत्यधिकारस्थाने स्तनमण्डले स्थिता कामदेवे स्थितिविधेया इति भावः। कस्याश्चित् स्तनयोः स्तने स्थितं हारं दृष्ट्वा सर्वोऽप्ययमिति निश्चितवतः कस्यचित् कामिनः भ्रान्तेः वर्णनमिदम्। अयं भ्रान्तिवर्णनरूपार्थः शृङ्गार-रसेन समाश्लिष्टः इति माधुर्यगुणः।

सौकुमार्योदाहरणम्—

प्रताप दीपाञ्जन राजिरेव
देव ! त्वदीयः करवाल एषः ।
नो चेदनेन द्विषतां मुखानि
श्यामायमानानि कथं कृतानि ॥ १६ ॥

प्रतापेति—हे देव ! हे राजन् ! त्वदीयः तव अयम् त्वदीयः एष पुरोवर्तमानः करवालः खड्गः प्रतापदीपस्य तत्प्रतापदीप-स्य अञ्जनराजिः कज्जलरेखा एव विद्यते। नो चेत् यदि तव प्रतापस्य अग्नि नहि अनेन खड्गेन द्विषताम् शत्रूणाम् मुखानि श्यामायमानानि मलिनानि कथम् कृतानि। अत्र निष्ठुराक्षरा भावात् सौकुमार्यम् गुणः ॥

गुणैरमीभिः परितोऽनुविद्धं
मुक्ता फलाना मिवदाम रम्यम् ।
देवी सरस्वत्यपि कण्ठ पीठे
करोत्यलङ्कार तया कवित्वम् ॥ १७ ॥

गुणैरिति—देवी दीप्तिमती सरस्वती अपि गुणैः सूत्रैः अनु-

विद्धम् मोहनम् रम्यम् मनोहरम्, मुक्ताफलानाम् दाम हारम्, अमीभिः उक्तलक्षणैः गुणैः परितः सर्वतः अनुविद्धम् मुक्ता कवित्वम् काव्यम् अलङ्कारतया भूषणभावेन कण्ठपीठे गतम् करोति धारयतीत्यर्थः। यथा कान्तया शोभावर्द्धनार्थम् कण्ठे हारः समर्प्यते, एवम् सरस्वत्या कण्ठालङ्करणार्थं काव्यं निर्मितम् इति भावः। एतेन कविता स्वभावतः सौन्दर्यशालिन्या अपि सरस्वत्याः मण्डनम् किमुत नराणाम् इति काव्यमहिमातिशयः सूचितः ॥

इति श्रीमद्गोदवंशोद्भव दौर्गादत्ति, ईश्वरीदत्तशास्त्री
रचितायां वाग्भटालङ्कारव्याख्यायां
व्याख्यायां तृतीयः परिच्छेदः

चतुर्थः परिच्छेदः

अथालङ्काराणां कथनम् उपक्रमते—

दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः ।
स्त्रीरूपमिव नो भाति तं ब्रुवेऽलंक्रियागमम् ॥ १ ॥

दोषैरिति—दोषैः पूर्वोक्तैः [illegible] मुक्तम् रहितम् गुणैः [illegible] युक्तम् अपि वचः [illegible] अलङ्कारेण [illegible] 'नो भवति' 'प्राये गच्छ' इत्यादि [illegible] अलङ्कारागमम् [illegible] इव स्त्रियाः सौन्दर्यम् इव [illegible]

भाति शोभते तम् अलङ्कियोगयम् अलङ्कारसमुदायम् ब्रुवे कथयामि । यथा निर्दोषापि गुणगणयुतापि रमणी भूषणैर्विना रमणीया न प्रतिभाति, एवं दोषशून्यमपि गुणान्वितमपि काव्यमलङ्कारैर्विना सहृदय हृदयहारितां नोपयातीति अलङ्कारा अपि गुणदोषवत् परमावश्यकाः सन्तीति भावः ।

अलङ्कारनामान्याह—

चित्रं वक्रोक्त्यनुप्रासौ यमकं ध्वन्यलङ्क्रियाः ।
अर्थालंकृतयो जातिरुपमा रूपकं तथा ॥ २ ॥
प्रतिवस्तूपमा भ्रान्तिमानाक्षेपोऽथ संशयः ।
दृष्टान्तव्यतिरेकौवापह्नुति स्तुल्ययोगिता ॥ ३ ॥
उत्प्रेक्षार्थान्तरन्यासः समासोक्तिर्विभावना ।
दीपकातिशयौ हेतुः पर्यायोक्तिः समाहितम् ॥४॥
परावृत्तिर्यथासंख्यं विषमः स सहोक्तिकः ।
विशेषोवसरः सारं श्लेषश्च समुच्चयः ॥ ५ ॥
अप्रस्तुत प्रशंसा स्यादेकावल्यनुमापि च ।
परिसंख्या तथा प्रश्नोत्तरं सङ्कर एव च ॥ ६ ॥

चित्रमिति—चित्रादीनि सङ्करान्तानि अलङ्कारनामानि ज्ञेयानि । तेषु चित्रम्, वक्रोक्तिः अनुप्रासः यमकम् इमे चत्वारः ध्वन्यलंक्रियाः शब्दालङ्काराः सन्ति । जात्यादयः सङ्करान्ताः पञ्चत्रिंशत् अर्थालङ्कृतयः अर्थालङ्काराः सन्ति अन्यत् स्पष्टम् ।

चित्रालङ्कारलक्षणम्—

यत्राङ्गसन्धितद्रूपैरक्षरैर्वस्तुकल्पना ।
सत्यां प्रसक्तौ तच्चित्रं तच्चित्रं चित्रकृच्चयत् ॥ ७ ॥

यत्रेति—यत्र यस्मिन् बन्धे वस्तुतः छत्रकमलचामरस्वरूपावयव कल्पना रचना अङ्गानाम् सन्धिषु संयोगेषु तद्रूपैः तदनुसारिभिः अङ्गतत्सन्धि सम्पादनायाम् उपकारकैः इत्यर्थः अक्षरैः भवति तत् प्रसत्तौ प्रसादगुणे सत्याम् चित्रम् चित्रालङ्कारः उच्यते । यद् च चित्रकृत् एकस्वरैक व्यञ्जनविशिष्टत्वेन आश्चर्यजनकम् भवति तदपि चित्रम् कथ्यते । यत्र नानाविधबन्ध विरचनलब्धचातुर्येण कविना छत्रकमलाद्याकार तदङ्ग तत्सन्धि सङ्कलनानुकूला वर्णाः एकस्वरा एकव्यञ्जना वा शब्दाः प्रयुज्यन्ते स चित्रालङ्कारो भवतीति स्फुटोऽर्थः ।

उदाहरणम्—

जनस्य नयनस्थानध्यान एनश्छिनत्त्विनः ।
पुनः पुनर्जिनः पीतज्ञानध्यानधनः सनः ॥ ८ ॥

जनस्येति—जनस्य नरस्य नयनयोः स्थानम् यस्य सः नयनस्थानः मुक्तिमार्गप्रदर्शकत्वेन नेत्रतुल्यः इत्यर्थः ध्यानः मोक्षप्रापकं ध्यानं यस्य तारकः पीनम् परिपक्वम् च तत् ज्ञानम् पीनज्ञानम्, ध्यानम् एकाग्रचिन्तनम्, पीनज्ञानम् च ध्यानं च पीनज्ञानध्याने, ते एव धनम् यस्य तथोक्तः इनः स्वामी सः प्रसिद्धः जिनः बुद्धः नः अस्माकम् एनः पापम् पुनः पुनः वारंवारम् छिनत्तु नाशयतु ।

लक्षणसमन्वयः—

अत्र अक्षराणाम् योजनप्रकारवशे गोमूत्रिकारूपे च सदाकाराङ्ग सन्धिसम्मुखीन समनुकूलत्वेन वर्णिताः इति आकारचित्रम् । ये ... गोमूत्रिकादिचित्रे प्रयोजनीये ।

एकस्वर चित्रोदाहरणम्—

गणगरा गणगरा कर तर चरण

परपद शरणगजन पथकथक ।
अमदन गतमद गजकर यमल
शममय जय भयघनवन दहन ॥ ९ ॥

गणेति—गणेषु नरसमुदायेषु वराः श्रेष्ठाः तेषां गणः समूहः तस्य वरं अभीष्टम् तस्य करणौ अतिशयेन साधकौ चरणौ यस्य तत्सम्बुद्धौ, हे परपद हे अनिर्वचनीयपदशालिन् ! शरणम् गच्छन्तीति शरणगाः शरणागताः ये जनाः तेषाम् पथकथकः मोक्षमार्गप्रदर्शकः तत्सम्बुद्धौ । हे अमदन कामविकारविवर्जित ! हे गतमद निरभिमान ! गजकरवत् हस्तिशुण्डादण्डवत् करयमलम् हस्तद्वयम् यस्य तत्सम्बुद्धौ हे गजकरयमल हे शममय शान्तिमयमूर्ते ! भयम् भीतिः तदेव घनवनम् तस्य दहनः अग्निः विनाशकः इत्यर्थः तत्सम्बुद्धौ हे भयघनवनदहन ! जय सर्वोत्कर्षेण वर्तस्व ।

लक्षणसमन्वय —

अत्र सर्वेषामेवाक्षराणामकार स्पर्शस्वरस्य विशिष्टत्वेन एक-स्वरचित्रम् ।

स्वरचित्रभेदं मात्राच्युतकमुदाहरति—

मूलस्थितिमधः कुर्वन् पार्श्वैर्जुष्टो गताक्षरैः ।
विटः सेव्यः कुलीनस्य तिष्ठतः पार्थिवस्य सः ॥१०॥

मूलस्थितिमिति—मूलस्थितिम् स्ववंशमर्यादाम् अधः कुर्वन् अनादरयन् दुराचारपथे गच्छन् गताक्षरैः मूर्खैः पार्श्वैः नाटक-दीक्षितैः विदूषकादिभिः जुष्टः सेवितः स विटः "सम्भोगहीनसम्पद् विटस्तु धूर्तः कलैकदेशज्ञः । वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्" इत्युक्तलक्षणः नाटकपात्रविशेषः यो हि महा-

चारमार्गे तिष्ठतः कस्य कुलीनस्य सत्कुलसम्भूतस्य पुरुषस्य सेव्यः पूजनीयः? न कस्योपीति भावः। 'विटः' इत्यत्र इकार-प्रश्लेषात् अर्थान्तरम् निः सरति-मूत्रानाम् जडानाम् स्थितिम् अधः भूतले कुर्वन् गतः आसमन्तात् स्मरः नाशः येषां तैः पात्रैः पत्रैः "पात्रं स्रुवादौ पर्णे च" इति विश्वः युक्तः युक्तः स वटः कौ पृथिव्याम् लीनस्य मार्गश्रमेण वैक्लव्यम् (खेदम्) गतस्य तिष्ठतः गतिनिवृत्तिं कुर्वतः पथिकस्य सेव्यः आश्रययोग्यः।

लक्षणसमन्वयः—

अत्र 'विटः' इत्यत्र इकारच्युतिः समग्रमेव पदार्थं परिवर्तयन्ती वैचित्र्यातिशयं जनयतीति मात्राच्युतकम्।

स्वरचित्रमेदं बिन्दुच्युतकमुदाहरति—

धर्माधर्मविदः साधुपक्षपातसमुद्यताः।
गुरूणां वञ्चने निष्ठा नरके यान्ति दुःखिताम् ॥११॥

धर्मेति-धर्मम् एव अधर्मम् विदन्ति जानन्ति इति यथोक्ताः साधूनाम् सज्जनानाम् पक्षस्य सहायस्य मतस्य वा पाते पातने समुद्यताः संनद्धाः गुरूणाम् पूज्यान पित्रादीनाम् वञ्चने प्रतारणे निष्ठाः साग्रहाः तत्पराः इति यावत् नरके दुःखिताम् दुःखभाक्त्वम् यान्ति दुःखमनुभवन्तीत्यर्थः। 'वचने' इत्यत्र बिन्दुनि-. नोऽर्थान्तरमाविर्भवति—हे नर! पुरुष! धर्माधर्मविदः . . . साधुपक्षपातसमुद्यताः साधूनाम् सज्जना- . . . सहायतायाम् समुद्यताः उपकारकाः गुरूणाम् . . . णाम् वचने आज्ञायाम् आज्ञापालने इति भावः निष्ठाः . . . के पुरुषाः दुःखिताम् यान्ति? न केपीत्यर्थः।

लक्षणसमन्वयः—

अत्र 'वचने' इत्यत्र बिन्दुच्युतिः समाहिता नञ्पदार्थं प्रकाशयन्ती आश्चर्यमाविष्करोतीति बिन्दुच्युतकं नाम चित्रम्।

एकव्यञ्जन चित्रम्—

ककाकुकङ्क केकाङ्क केकिकोकैक कङ्कः ककः।
अकुकोकः काक ककाः ककाकु कुककाङ्ककः॥१२॥

केति—केन उपन्यसितः काकुः ध्वनिः येषां ते ककाकवः केका कूजितविशेषः अङ्कम् चिन्हम् येषाम् ते केकाङ्काः केकाङ्काः केकाश्चैव केकिनः मयूराः केकाङ्ककेकिनः कङ्काश्च कोकाङ्ककेकि- नश्च कोकाः चक्रवाकाश्च कङ्ककेकाङ्क केकिकोकाः ककाकवश्चते कङ्ककेकाङ्क केकिकोकाः ककाकुकङ्क केकाङ्क केकिकोकाः तेषाम् एकाकुः भूमिः निवासस्थानम्, कवः कुत्सिताः न कवः अकवः कम् जलमेव ओकः स्थानम् येषां ते कोकसः काकाः एव का- ककाः अकवः कोकसश्च ते काककाः अकुकोकः काककाः तेषाम् अक्षा मता ककः येऽद्यत्वासि एव काककः श्वनदः तेषाम् कुकः ग्राहकः ककाकु कुकः ककाकु कुककाङ्कः कः ब्रह्मा अ- ङ्कः अङ्के यस्य सः ककाकु कुककाङ्कः विष्णुः यस्य कुः निवास स्थानम् शयनस्थानम् वा ककः केन वायुना इतस्ततः कम् जलम् यत्र स ककः समुद्रः वर्तते इति शेषः। कैश्चित्तु पुस्तकेषु द्विधा ' कुकुकोकः काककाकङ्काकुकुक काङ्ककः ' इति पाठः समुपलभ्यते स एवं व्याख्येयः—कौ पृथिव्यां कवः कुत्सिताः कुकवः कुकवश्च ते कोकाः काककाः कुकु कोकाः काककाः काक आकाशात् मयादयन्ति इति कुकुकोकः काककाकाः तथा कु- धाः अकवः (अल्पत्वे नञ्पदे देवाः ...) ... तामान काकवः ध्वनि विशेषाः तेन ... ...

लक्षणसमन्वयः—

अत्रोपमितः मन्दगैः करास्त्रैरेक त्रप्रअन विशिष्टेन कर्ण-मौक्तिक सङ्कलमाक्ति मणीतपन पाठकस्य मनसि विस्मयमुद्भावयतीति 'पूर्वकस्मनाविजय'।

[illegible]—

करैन् दिवाकरास्तैरे द्यधगरणडम्बरम् ।
देव गौरमाक्रमेनागः करेणुः प्रसरत्यसौ ॥ १३ ॥

[illegible] हे देव! [illegible]
[illegible]
[illegible]
[illegible] 'करेणुः' [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]
[illegible]
[illegible]

[illegible]

[illegible] ।
[illegible] ॥ १४ ॥

[illegible]
[illegible]
[illegible]

इतीरा आह प्रत्युत्तरयति सा वक्रोक्तिः कथ्यते इति शेषः ।

भङ्गश्लेषमया वक्रोक्तेरुदाहरणम्—

नाथ मयूरो नृत्यति
तुरगानन वक्षसः कुतो नृत्यम् ?
ननु कथयामि कलापिन-
मिह सुखलापी प्रिये कोस्ति ?

नाथेति—हे नाथ ! हे स्वामिन् ! मयूरः नृत्यति वर्तनम् करोति इति कस्याश्चिन्नायिकाया उक्तिः । तुरगाननस्य घोटकमुखस्य किन्नरविशेषस्य वक्षसः नृत्यम् वर्तनम् कुतः घोटकमुखस्य किन्नरस्य वक्षः कदापि नृत्यतीति नायकस्य वक्रोक्तिः । पुनर्नायिका 'मया मयूर शब्दः तुरगान न वक्षोरूपे अर्थे न प्रयुज्यते' इत्याह— ननु भोः नाथ ! अहम् कलापिनम् बर्हिणम् कथयामि कलापि पदवाच्यः पक्षिविशेषः नृत्यतीत्युच्यते मया इति भावः । हे प्रिये ! इह जगति कः पुरुषः सुखलापी सुखम् यथा भवति तथा लपितुम् वक्तुम् शीलं यस्य तादृशः अस्ति ? नात्र कोऽपि मधुरभाषीति भावः । इयम् नायकस्य वक्रोक्तिः ।

लक्षण समन्वयः—

अत्र उत्तरदः नायकः नायिकया मयूरपदवाच्य पक्षिविशेषरूपवस्तुनेऽर्थे प्रयुक्तस्य 'मयूर' शब्दस्य 'मयु' 'उरः' इति खण्डद्वयं कृत्वा 'मयु' पदस्य 'तुरङ्गवदनो मयुः' इत्यमरवाक्यानुसारम् घोटकमुख किन्नररूपे वस्तुनेऽर्थे शक्तिं गृहीत्वा 'उरः' पदस्य च वक्षोरूपं प्रसिद्धमर्थं गृहीत्वा 'तुरगाननवक्षसः कुतो नृत्यम्' इत्यन्यमर्थमाश्रित्य उत्तरयति; एवम् नायिकया कलापविशिष्ट पक्षिविशेषरूपेऽर्थे प्रयुक्तम् 'कलापि' पदम् 'क' 'लापी' इति

खण्डयन् 'कः' इत्यस्य स्थाने '-लापी' इत्यस्य च '-भापी' इत्यस्मिन् शक्तिं गृह्णन् '-सुखलापी भिषेकोऽस्ति' इत्यन्यमर्थं मवलम्ब्य उत्तरयतीति वक्रोक्त्यलङ्कारः ।

श्लेषावलम्बिन्या वक्रोक्तेरुदाहरणम्—

भर्तुः पार्वति ! नाम कीर्तय न चेत्त्वां ताड़यिष्याम्यहम्
क्रीड़ाजेन शिवेति सत्य मनघे किं ते शृंगालः पतिः ।
नो स्थाणुः किमु कीलको न हि पशुस्वामी नु गोभागवाम
दोलाखेलनकर्मणीति विजया गौर्योर्गिरः पान्तु वः ॥१६

भर्तुरिति—हे पार्वति ! भर्तुः पत्युः नाम संज्ञाम् कीर्तय कथय, न चेत्, यदि त्वम् न कथयसि तर्हि अहम् त्वाम् क्रीडाब्जेन लीला-कमलेन ताडयिष्यामि । इयम् विजयायाः उक्तिः । शिवेति, मम पत्युः नाम शिवेति वर्तते इति पार्वत्या कथयन्त्याम् 'शिवेति' इत्यस्य 'शिवा' इति 'इति' इति खण्डद्वयं कृत्वा, 'शिवा' पदस्य च 'शिवा गौरी फेरवयोः' इत्यमरवचनानुसारं शिवाभिधेये शृगाल रूपेऽर्थे शक्तिं गृहीत्वा विजया आह—हे अनघे ! पाप-रहिते ! ते पतिः शृंगालः अस्ति इति सत्यम् किम् ? नो मे पतिः शृंगालः नास्ति किन्तु स्थाणुः स्थाणुपदवाच्यः देवः अस्ति इति गौर्याः उक्तिः । स्थाणु पदस्य कीलक पदार्थं गृहीत्वा विजया सहास—कीलकः किमु ! किं ते पतिः कीलकः अस्ति ? न हि मे पतिः कीलकः नास्ति किन्तु पशुस्वामी पशुपति पदवाच्यः सदा-शिवोऽस्ति इत्यर्थः इति गौर्याः पुनरुक्तिः । यदि 'पशुस्वामी' इत्यु-क्तवती तर्हि ते पतिः गवाम् गोमान् रक्षकः गोपः अस्ति नु किम् ? दोलायाम् खेलनम् क्रीडा एव कर्म क्रिया तस्मिन् विजया गौर्योः पार्वती सख्याः विजयायाः पार्वत्याश्च इति पूर्वोक्ताः गिरः उक्ति-प्रत्युक्तयः वः युष्मान् पान्तु रक्षन्तु ।

लक्षणा समन्वयः—

अत्र उत्तरपदात् विजया गौरी हास्यार्थं प्रयुक्तानां दिग्दन्तानां दिवस्थाणु पशुपति पदानां पार्वत्यनभिप्रेतेषु शृगाल कीलक गोपालकरूपेष्वर्थेषु शक्तिं गृहीत्वा मत्युत्तरपतीति श्लेषावलम्बिनी वक्रोक्तिः।

अनुप्रासलक्षणम्—

तुल्य श्रुत्यक्षरा वृत्ति रनुप्रासः स्फुरद्गुणः ।
अतत्पदः स्या च्छेकानां लाटानां तत्पदश्च सः ॥१७॥

तुल्येति—तुल्या अभिन्ना श्रुतिः श्रवणम् येषां तानि अक्षराणि वर्णाः तेषाम् आवृत्तिः पुनः पुनः प्रयोगः अनुप्रासः कथ्यते। सः अनुप्रासः स्फुरन्तः स्फुटाः गुणा औदार्य प्रभृतयः यत्र तादृशो भवति। अनुप्रासतः गुणाः सुस्पष्टाः भवन्तीति भावः। छेकानाम् विदग्धानाम्, 'छेकविदग्धेषु विदग्धेषु' इत्यमरः, अनुप्रासः अतत्पदः न सन्ति तानि पदानि यत्र तादृशः भिन्नपदःभवतीत्यर्थः। *लाटानाम् लाटदेशजनानाम् अनुप्रासः तु तत्पदः पूर्वप्रयुक्त पद*वान् भवति। एवं च अनुप्रासः द्विविधः, भिन्नपदवान् छेकजनप्रियः छेकानुप्रासः एकः, अभिन्नपदवान् लाटजनप्रियः लाटानुप्रासः अपरः।

छेकानुप्रासोदाहरणम्—

अलं कलङ्क शृङ्गार ! कुरु प्रसर हेलया ।
चन्द्र ! चण्डीश निर्माल्य मसि न स्पर्श महसि॥१८॥

अलमिति–*हे कलङ्क शृङ्गार !* कलङ्कः अपवादः शृङ्गारेण गुरुपत्न्या सह सुरतेन यस्य तत्सम्बुद्धौ ('सुरते रसभेदेच शृङ्गारम्' इति हैमः) यद्वा कलङ्केन उपलक्षितम् शृङ्गारम् गुरुपत्नी गमनम्

यस्य तत्सम्बुद्धौ हे चन्द्र ! काराणाम् किरणानाम् प्रसरः विस्तारः एव हेला विलासः तया अलम् न कि मपि प्रयोजनम् । त्वम् चण्डीशस्य पार्वतीपतेः शिवस्य निर्माल्यम् त्वितम् असि अतः स्प्रष्टुम् न अर्हसि स्पर्शयोग्यो नासि 'अग्राह्यं शिवनिर्माल्यम्' इति शिवनिर्माल्य ग्रहणस्य निषेधोऽस्तीति भावः ।

लक्षण समन्वयः—

अत्र पूर्वार्द्धे रेफ लकारककाराणामावृत्तिः उत्तरार्द्धे चकार शकार सकाराणामावृत्तिश्च भिन्नपदावलम्बिनी इति छेकानुप्रासः॥

लाटानुप्रासोदाहरणम्—

रणे रणविदो हत्वा दानवान् दानव द्विषा ।
नीति निष्ठन भूपाल भूरियं भू स्त्वया कृता ॥१९॥

रण इति—हे भूपाल ! हे जगद्रक्षक ! श्रीकृष्ण दानवानाम् द्विषा शत्रुणा, नीतौ नये निष्ठा स्थितिः यस्य तेन नीति निष्णातेनेत्यर्थः त्वया रणे युद्धे रणविदः युद्धव्यापार निपुणान् दानवान् हत्वा इयम् पुरोदृश्यमाना भूः पृथ्वी भूः कृता पुनः नानारत्नपूर्णा तेन अन्वर्थनाम्नी विहितेति भावः ।

लक्षण समन्वयः—

अत्र भूरण दानवशब्दानामावृत्तिः पूर्वमयुक्तपद विषयिणी इति लाटानुप्रासः ।

पादावृत्त्या लाटानुप्रासमुदाहरति—

त्वं प्रिया चेच्चकोराक्षि ! स्वर्गलोकसुखेन किम् ।
त्वं प्रियायदि न स्या मे स्वर्गलोकसुखेन किम् ॥२०॥

त्वमिति—हे चकोराक्षि ! चकोरनयने ! चेत् यदि त्वम् मे प्रियास्याः मम तदा स्वर्गलोकस्य सुखेन अप्सरसानोर्वशी भोगादि

गन्धेव आनन्देन किम् स्वर्गभानुभवः तस्मादपि उत्कृष्टतरः इति भावः । यदि त्वं मे प्रिया न स्याः तदा स्वर्गसुखेन किम् त्वदनुरागस्याभावे स्वर्गभोगेऽपि नानन्दद. इत्यर्थः ।

लक्षण समन्वयः—

अत्र 'स्वर्गलोक सुखेन किम्' इति पादस्य पुनरावृत्तिः इति तत्पादः लाटानुप्रासः ।

पुनश्छेकानुप्रासमुदाहरति—

एकत्र पात्रे स्वकलत्रवक्त्रम्
नेत्रामृतं बिम्बितमीक्षमाणः ।
पश्चात्पपौ सीधुरसं पुरस्तात्
ममाद कश्चिद्यदुभूमि पालः ॥ २१ ॥

एकत्रेति—कश्चित् अज्ञातनामधेयः यदुभूमिपालः यदुभूपतिः नेत्रामृतम् नेत्रयोः अमृतम् अमृतवत् सन्तर्पणम् शान्ति जनकम् वा स्वकलत्रस्य स्वपत्न्याः वक्त्रम् मुखम् एकत्र एकस्मिन् पात्रे पानपात्रे इत्यर्थः बिम्बितम् सञ्जात प्रतिबिम्बम् ईक्षमाणः पश्यन् पुरस्तात् मद्यपानात् प्रथमम् ममाद मदयुक्तो बभूव पश्चात् मद्योत्सवेरनन्तरम् तत्कारणभूतम् सीधुरसम् मदिरारसम् पपौ ।

लक्षण समन्वयः—

अत्र पूर्वार्द्धे एकारस्य त्रकारस्य च पुनः पुनरावर्त्तनम् । उत्तरार्द्धे सकारस्य पकारस्य वा होपः । सा च आवृत्तिः अतत्पदगा (भिन्नपदगा) अस्तीत्यतोऽत्र छेकानुप्रासः ।

यमक लक्षणम्—

स्यात्पादपदवर्णाना मावृत्तिः संयुता युता ।
यमकं भिन्न वाच्यानामादि मध्यान्त गोचरम् ॥२२॥

स्यादिति–भिन्नः वाच्यः अर्थः येषाम् तेषाम् पादः पद्यस्य चतुर्थभागः पदम् सुप्तिङन्त रूपम् वर्णाः अक्षराणि तेषाम् संयुता भिन्नजातीय पदैरव्यवहिता अयुता भिन्नजातीय पदैर्व्यवहिता वा आवृत्तिः पुनरुक्तिः यमकम् तन्नामालङ्कारः कथ्यते। तत्र च यमकम् आदि मध्यान्त गोचरम् आद्यपादगतम्, मध्य (द्वितीय तृतीय) पादगतम् अन्तपादगतम् च भवति । पूर्वम् पादपदवर्ण गतत्वेन यमकस्य त्रैविध्यम्, ततः पादपदवर्णावृत्तेः संयुताः पुनस्त्वेन तत्र षड्विधम्, तदन्तरम् तस्य आद्यमध्यान्तपादगतत्वेन त्रैविध्यात् अष्टादश भेदाः । यद्यपि यमके इव लाटानुप्रासेऽपि तान्येव पदानि प्रयुज्यन्ते तथापि लाटानुप्रासे पुनरुक्त पदानां भिन्नार्थता न भवतीति यमकात् भेदः ।

संयुतावृत्ति पादयमकस्योदाहरणम्—

दयां चक्रे दयाश्चक्रे ।
सतां तस्मात् भवान् वित्तम् ॥ २३ ॥

दयामिति–भवान् दयाम् कृपाम् चक्रे तस्मात् सताम् सज्जनेभ्यः ' कर्मादीनामपि सम्बन्ध विवक्षायां षष्ठ्येव ' इति सम्प्रदाने [illegible] वित्तम् धनम् दयाश्चक्रे ददौ । अत्र गीता छन्दः ।

लक्षण समन्वयः—

अत्र ' दयाश्चक्रे ' इति प्रथमपादस्य द्वितीयं पादे आवृत्तिः सा च आवृत्तिः पदान्तरैरव्यवहिता इति संयुतावृत्ति पादयमकम् ॥

संयुतावृत्ति मध्यपादयमकस्योदाहरणम्—

यशस्ते समुद्रान् सदारोर गारेः ।
सदारोर गारेः समानाङ्ग कान्तेः ॥ २४ ॥

यश इति–उरसा वक्षसा गच्छन्तीति उरगाः सर्पाः तेषाम्

अरिः शत्रुः गरुडः तस्य समाना तुल्या अङ्ग कान्तिः शरीरद्युतिः यस्य तादृशस्य, सदा नित्यम् रोरम् दारिद्र्यम् गच्छन्ति तादृशाः अरयः यस्य तथोक्तस्य (रोरं दारिद्र्यमुच्यते) ते तव निर्मलम् यशः कीर्तिः समुद्रान् पार गतवान् । अत्र कस्यचित् राज्ञः जगद्विस्तृतायाः कीर्तेर्वर्णनम् । सोमराजी छन्दः ।

लक्षण समन्वयः—

अत्र 'सदारोरगारेः' इति द्वितीयपादस्य तृतीयपादे आवृत्तिः सापि अन्तरालपदैरव्यवहितत्वेन संयुता इति संयुतावृत्ति मध्य पादयमकम् ।

संयुतावृत्ति पादान्तयमकस्योदाहरणम्—

द्विषा मुद्धतानां विहंसि त्वमिन्द्रश ।
मुदम्भोधराणा मुदम्भोधराणाम् ॥ २५ ॥

द्विषामिति–हे इन्द्र ! त्वम् उद्धतानां पक्षविशिष्टत्वेन विनयम् अभजताम् द्विषाम् जगदुपद्रवजनकत्वेन शत्रु शत्रुभूतानाम् उदम्भोधराणाम् उद्गताः अम्भोधराः मेघाः येषाम् धराणाम् पर्वतानाम् मुदं दर्पम् विहंसि विनाशयसि तेषां पक्षखण्डनादिति भावः । सोमराजी छन्दः ।

लक्षण समन्वय —

अत्र 'मुदं भोधराण म' इति तृतीयपादस्य पादान्ते (चतुर्थपादे) निर्व्यवधाना आवृत्तिः इति संयुतावृत्ति पादान्तयमकम् ॥

आद्यमध्यपादयमकं मध्यान्तपादयमकञ्चैकपद्येनोदाहरति—

विभातिरामा परमारणस्य
विभातिरामा परमारणस्य ।
सदैव तेजोर्जित राजमान !

सदैव तेजोर्जित राजमान ! ॥ २६ ॥

विभातीति—अजस्य विष्णोः ऊर्जितम् बलम् इव ऊर्जितम् यस्य तत्सम्बुद्धौ हे अजोर्जित ! हे राजमान ! शोभमान ! दैवम् भाग्यम् "दैवं दिष्टं भागधेयं भाग्यम्" इत्यमरोक्तेः, तेन सहितम् सदैवम् तथा भूतं यत्तेजः प्रतापः तेन ऊर्जितः प्राप्तः राजसु नृपाणां मध्ये मानो येन तत्सम्बुद्धौ हे सदैव तेजोर्जित राजमान ! परायणम् शत्रूणाम् मारणस्य नाशकस्य ते तव रणस्य युद्धस्य अभिरामा अन्तिक्रान्तः रामः रामचन्द्रः परशुरामः वा यया तादृशी रामा रमणीया परमा उत्कृष्टा विभा कान्तिः विभाति शोभते ।

लक्षणसमन्वयः—

अत्र 'विभातिरामा परमारणस्य' इति प्रथम पादस्य द्वितीये पादे, "सदैव तेजोर्जित राजमान" इति द्वितीय पादस्य च चतुर्थे पादे विजातीय व्यवधायकवर्णैः अव्यवहिता आवृत्तिः इति अतोऽत्र मध्यपादयमकम् मध्यान्तपादयमकम् च ।

अयुताक्षरि प्रथममध्यपादयमकोदाहरणम्—

सारं गवयसां निध्यरानि काननमग्रनः ।
सारङ्ग वयसां निध्यदारुणं शिखरे गिरेः ॥ २७ ॥

सारमिति—अग्रतः पुरतः गिरेः पर्वतस्य शिखरे शृङ्गेसारम् मध्यगम् गवयानाम् गोसदृश पशुविशेषाणाम् सां निध्येन सामीप्येन राजित शोभते इति तथोक्तम् निधिभिः निधानैः अदारुणम् अभयङ्कराम् यत्र मनुष्याः निधि प्राप्तिवाञ्छया निर्भयं विचरन्तीति भावः सारङ्गवयसाम् मृगपक्षिणाम् तैः उपाश्रितम् इति भावः काननम् वनम् अस्तीति शेषः ।

लक्षण समन्वयः—

अत्र 'सारं गवयसां निध्य' इति आद्यपादस्य मध्यपादेः

तृतीयपादे आवृत्तिः, सा च आवृत्तिः भिन्नार्थवर्णैर्विभिः न द्वितीयपादेन व्यवहिता इति अयुतावृत्ति मध्यान्तपादयमकम्।

अयुतावृत्ति मध्यान्तपादयमकोदाहरणम्—

अमरनगरस्मेराक्षीणां प्रपञ्चयति स्फुरत्

सुरतरुचये कुर्वाणानां वलक्षमरं हसम्।

इह-सह सुरै रायान्तीनां नरेश ! नगेऽन्वहम्

सुरतरुचये कुर्वाणानां वलक्षमरं हसम् ॥ २८ ॥

अमरेति—हे बलक्षम ! पराक्रमसमर्थ ! हे नरेश ! राजन् ! सुरतरूणाम् कल्पवृक्षाणाम् चयः समूहः यत्र तथोक्ते इह अस्मिन् नगे पर्वते वाणानाम् तदाख्य वृक्षविशेषाणाम् कुः भूमिः स्फुरन्ती अभिव्यक्ता या सुरतस्य कामक्रीडायाः रुचिः अभिलाषः तदर्थम् सुरैः देवैः सह आयान्तीनाम्, तथा अरम् अत्यन्तम् वलक्षम् श्वेतम् हसम् हास्यम् "यशस्तु वर्ण्यते हास्यकीर्त्योः" इति दर्पणोक्त्यनुसारं हास्यस्य गौरता वर्ण्यते, कुर्वाणानाम् अमरनगरस्य देवपुरस्य स्मेराक्षीणाम् स्मेराक्ष्यः कामिन्यः तासाम् इमम् नगम् सुरतविषयक विलासमङ्गलमयं करोति इति भावः अपभ्रपमि विस्तारयति।

लक्षणसमन्वय—

अत्र द्वितीयपादस्य चतुर्थपादे आवृत्तिः, सा च भिन्नार्थशालिनी अन्तः मध्यस्थेन तृतीयपादेन व्यवहिता इति अयुतावृत्ति मध्यान्तपादयमकम्।

आद्यन्तयमकोदाहरणम्—

आसन्नदेवानरराजराजि-

रुच्चैस्तटानामियमत्र नाद्रौ।

क्रीडाकृतो यत्र दिगन्त नागा
आसन्नदे वानरराज राजि ॥ २९ ॥

आसन्नेति–अत्र अस्मिन् अद्रौ पर्वते आसन्नाः समीपवर्तिनः देवा यस्याः तादृशी तटानाम् उच्चैः उन्नता राजिपङ्क्तिः न रराज न शुशुभे इति न अपि तु शुशुभे एवेत्यर्थः । यत्र यस्याम् राजौ वानरराजैः श्रेष्ठवानरैः राजनीति तयोक्ते नदे ह्रदविशेषे दिगन्तनागाः दिग्गजाः क्रीडाकृतः जलखेलाकारिणः आसन्।

लक्षण समन्वयः—

अत्र प्रथमपादस्य चतुर्थपादे आवृत्तिः सा च द्वितीयतृतीय पादाभ्यां व्यवहिता इति अयुतावृत्ति आद्यन्त यमकम् ।

महायमकोदाहरणम्—

रम्भारामा कुरवक ! कमला
रम्भारामा कुरवक कमला ।
रम्भारामा कुरवक कमला
रम्भारामा कुरवक कमला ॥ ३० ॥

रम्भेति–नास्ति कृत्रिमो रवो यस्य सः अकुरवः अकुरव एव अकुरवकः तत्सम्बुद्धौ हे अकुरवक ! मधुरभाषिन् ! हे मेघे ! रम्भाभिः कदलीभिः उपलक्षिताः आरामाः उपवनानि यस्याम् सा तथोक्ता, कमलानाम् आरम्भः उत्पत्तिः यस्याम् सा कमलारम्भा, रामा मनोहरा, यद्वा कमलानाम् आरम्भेण आगमनेन रामा, कुरवकाः एव कुरवककाः वृक्षविशेषाः तान् कमते वाञ्छतीति कुरवककमला, रम्भा अप्सरो विशेषः इव रामाः स्त्रियो यत्र तथोक्ता दिव्यसौन्दर्यशालिनीभिः सुन्दरीभिः भूषिता इत्यर्थः आरब्ध मकराग्निमूत्यच कवकम् अस्य यत्र तथोक्ता ('कवर्ग

जलम् ' इत्यमरः) अरम् अत्यन्तम् भैः नक्षत्रैः आरामा दीप्ति-मती रात्रिरिति भावः यद्वा भया शोभया रामा लक्ष्मीः तत्सदृशी इत्यर्थः, अकुः अकुत्सिता, अरक कमला अरनम् एव अः अरे हरसणे कम् सुखम् येषाम् तथोक्ताः कमलाः हरिण भेदाः यत्र तादृशी ('मृगभेदे तु कमलः' इति मेदिनी) कुः पृथ्वी आसीत् इतिशेषः

लक्षण समन्वय—

अत्र पूर्वार्धस्य उत्तरार्धे आवृत्तिः इत्यनोत्र आवृत्तेः सर्वपाद-गतत्वेन यमकस्य महायमकत्वम् ॥

संयुतावृत्ति आदिपदयमकोदाहरणम्—

हारीतहारी ततमेपधत्ते
सेवालसेवाल सहंसमम्भः ।
जम्बालज बालमलं दधानं,
मन्दार मन्दार व वायुरद्रिः ॥ ३१ ॥

हारीतेति—हारीतैः तदाख्यैः पक्षिविशेषैः । हारी मनोहर मन्दारेषु मन्दारवृक्षेषु मन्दः शनैः शनैः वहन् आ ईषत् मन्दरः इत्यर्थः रवः ध्वनिः यस्य तादृशः वायुः पवनः यत्र तथोक्तः एष पुरोवर्ती अद्रिः पर्वतः सेवालानाम् जलनीलीनाम् सेवा सेवनम् उपभोगः इति यावत् तस्याम् बालम् अभिनवेन अलसाः मन्थराः हंसाः यत्र तत् ततम् विस्तृतम्, जम्बालात् पङ्कात् जातम् जम्बा-लजम् पङ्कजम् कमलम् इत्यर्थः अलम् अत्यर्थम् दधानम् धारयत् अम्भः जलम् धत्ते धारयति ।

लक्षण समन्वयः—

अत्र हारीत, सेवाल, जम्बाल, मन्दार पदानां प्रत्येकपादादौ आवृत्तिः सा च अव्यवहिता इति संयुतावृत्ति आदिपदयमकम् ।

मध्यपदयमकोदाहरणम्—

नेमिर्विशालनयनो नयनोदित श्री
रभ्रान्तबुद्धिविभवो विभवोऽथ भूयः ।
प्राप्तस्तदा जनगराज्ञगराजि तत्र
सूतनचारु जगदे जगदेकनाथः ॥३२ ॥

नेमिरिति—विशाले दीर्घे नयने नेत्रे यस्य सः नयेन न्यायेन नोदिता प्रेरिता श्रीः सम्पत् यस्य तथोक्तः अभ्रान्तिः भ्रान्तिशून्यः बुद्धेः विभवः ऐश्वर्यं यस्य सः विगतः भवः जन्म यस्य तादृशः वासनाशून्यत्वेन पुनर्जन्मयोनिरहित इति भावः तदा अत्र नारायणस्य पुरात् नगरात् तत्र तस्मिन् नगराजि पर्वतेश्वरे रैवतके प्राप्तः नेमिः सताम् धार्मिकविशिष्टैः सूतेन सारथिना भूयः पुनः चारु मनोहरम् यथा भवति तथा जगदे प्रोक्तः ।

लक्षण समन्वय.—

अत्र नयन, विभव, नगर, जगदे पदानाम् क्रमेण प्रथम, द्वितीय, तृतीय, चतुर्थ पादानाम् मध्ये व्यवधानशून्या आवृत्तिः इति मध्यावृत्तिः मध्यपदयमकम् ।

अन्तयमकोदाहरणम्—

यदुपान्तिकेषु सरला सरलाः
यद् नृचलन्ति हरिणा हरिणा ।
तदिदं विभाति कमलं कमलं
मदमन्य यत्र परमापरमा ॥ ३३ ॥

यदिति—यस्य उपान्तिकेषु प्रान्तेषु सरलाः अकुटिलाः सरलाः देवदारुवृक्षाः सन्ति, यत् यस्य अनु पश्चात् हरिणाः मृगाः हरिणा वायुना सह चलन्तीति भावः उपवनानि वहन्ति,

मन इदम् यमकम् अष्ट विभाति शोभते यम यस्मिन् असे दशक्त पदस्य पादस्य यदा पदयोः पाद पदान्तम् यदस्य इत्येव आप मात्रवती ।

लक्षण समन्वयः—

अत्र कान्त: इति, कान्त, पादावृत्ता क्रमेण चतुर्णां पादानामन्ते निरन्तराला आवृत्तिः इति अन्त्ययमकम् ।

अयुताहृत्ति-आदियमकस्योदाहरणम्—

कान्तारभूमौ पिककामिनीनां
कां तारवाचं क्षमते स्म सोढुम् ।
कान्ता रतेशेऽध्वनि वर्तमाने
कान्तारविन्दस्य मधोः प्रवेशे ॥ ३४ ॥

कान्तेति—कान्ता पत्नी यस्य रतेशे स्वामिनि अध्वनि मार्गे वर्तमाने, सत्तु कान्तानि मनोहराणि कमलानि यस्मिन् तस्य मधोः वसन्तस्य प्रवेशे कान्तारभूमौ वनस्थलानाम् पिककामिनीनाम् कोकिलानाम् काम् तारवाचम् उच्चैः कूजितम् सोढुम् क्षमते स्म दयालुः न कामपि इति भावः ।

लक्षण समन्वय.—

अत्र प्रत्येक पादस्य आदौ 'कान्तार' पदस्य आवृत्तिः सा च पदान्तरव्यवहिता इति अयुताहृत्ति आदि यमकम् ।

अयुताहृत्ति मध्ययमकस्योदाहरणम्—

चकार साहसे युद्धे धृतोल्लासा हसं चयाः ।
दैन्यं त्वां साह संप्राप्ता द्विषां सोत्साह सन्ततिः ॥ ३५ ॥

चकारेति—हे सोत्साह वरद गुण ! नृपते ! इति शेषः पा द्विषाम् शत्रूणाम् सन्ततिः समुदायः युद्धे साहसम्: चकार. धृतो—

श्यामा जयप्राप्ति जन्यानन्द विकसितमुखी च सती इमम् हास्यम् चकार अन्यान् मापयेति भावः । सा शत्रुश्रेणिः त्वाम् सम्प्राप्ता सती दैन्यम् चकार दीनताम् प्रकटयाम इत्यर्थः 'ह' इति पाद पूरणार्थकमव्ययम्, यद्वा 'साह' इति 'सा' 'आह' इति छेदः । आह च दैन्यप्रकटनानन्तरम् क्षमाप्रार्थनां चकारेत्यर्थः ।

लक्षण समन्वयः—

अत्र 'साहस' पदस्य प्रथिकपादस्य मध्ये मध्यवधाना आवृत्तिः इति अयुतावृत्ति मध्यपदयमकम् ।

अयुगावृत्ति-अन्तपदयमकोदाहरणम्—

गिरां श्रूयते कोकिला कोविदाऽरं
यतस्तद्वनं विस्फुरत्कोविदारम् ।
मुनीनां वसत्यत्र लोको विदारं
न च व्याधचक्रं कृतौकोविदारम् ॥ ३६ ॥

गिरामिति—अत्र वने गिराम् वाचाम् विषये कोमलतामधु-रतादि विषये अपि अत्यन्तम् कोविदा पण्डिता कुशलेत्यर्थः कोकिला वसति इति श्रूयते जनैः इति अध्याहार्यम्, यतः यस्मात् कारणात् तत् वनम् विस्फुरन्तः विकसन्तः कोविदाराः काञ्चनार वृक्षाः यत्र तादृशम् अस्ति, कोविदार वृक्षप्रियायाः कोकिलायाः कोविदारवृक्षवने वासः युज्यते एव इति भावः । अत्र मुनीनाम् मौनावलम्बिनानाम् तपस्विनाम् लोकः समूहः विदारम् कलत्र-शून्यम् यथा भवति तथा वसति, वीन् पक्षिणः दारयति नाश-यति इति तथोक्तम् व्याधचक्रम् व्याधसमूहः कृतम् ओकः निवासस्थानम् येन तादृशः न च वर्तते, व्याधकृतपरत्वेन पक्षिणोऽपि सुखं विचरन्तीति भावः ।

लक्षण समन्वयः—

अत्र 'कोविदार' पदस्य प्रत्येकपादान्ते सव्यवधाना आवृत्तिः इति अयुताश्रितं अन्तपदयमकम् ।

पादद्वयेऽपि आदिमध्यमध्यान्तयमकानि भवन्तीत्युदाहरति—

सिन्धुरोचितलताग्रशल्लकी
सिन्धुरोचितमुपेत्य किन्नरैः ।
कन्दराजितमद्रस्तटं गिरेः
कन्दराजितगृहश्रि गीयते ॥ ३७ ॥

सिन्धुरेति—किन्नरैः सिन्धुराणाम् हस्तिनाम् उचिता योग्या भक्षणयोग्येत्यर्थः लताग्राः लताप्रधानाः शल्लकयः यत्र तथोक्ताः याः सिन्धवः नद्यः ताभिः रोचितम् विभूषितम्, कन्दैः मूलविशेषैः राजितम् शोभितम्, कन्दराभिः गुहाभिः जिता तिरस्कृता गृहाणाम् श्रीः शोभा येन तादृशम् अद्रेः पुरोदृश्यमानम् गिरेः पर्वतस्य तटम् शिखरम् उपेत्य प्राप्य गीयते ।

लक्षण समन्वयः—

अत्र 'सिन्धुरोचित' पदस्य प्रथमपादस्य द्वितीयपादस्य चादौ आवृत्तिः इति पूर्वार्द्धे आदिमध्यपादादिगतं पदयमकम्, एवम् 'कन्दराजित' पदस्य तृतीयपादस्य चतुर्थपादस्य चादौ आवृत्तिः इति उत्तरार्द्धे मध्यान्तपादादिगतं पदयमकम् ।

पादत्रयगतं मध्यपदयमकमुदाहरति—

वसन् सरोगोऽत्र जनो न कश्चित्
परं सरोगो यदि राजहंसः ।
गीतं फलं को न करोति सिद्धः
शैले कलङ्कोज्झित काननेस्मिन् ॥ ३८ ॥

वसन्निति—कलङ्केन अपवादेन रोगेण वा अंग्मशम रहितं काननम् वनम् यत्र तथोक्ते अत्र अस्मिन् शैले पर्वते कश्चित् जनः कोपि नरः सरोगः रोगयुक्त नास्ति, पूतपवनं निर्मलजल शालित्वेन स्वास्थ्य वृद्धिकरत्वं पर्वतः इति भावः । परम् किन्तु यदि अत्र कश्चित् सरोगःनर्हि राजहंसःएव सरःमानसाख्यम् सरःगच्छति इति तादृशः अस्ति । अस्मिन् पर्वते कः सिद्धः देवयोनिविशेषः कलम् ललितम् गीतम् न करोति ? सर्वः एव करोतीति भावः ।

लक्षण समन्वय—

अत्र "सरोग" पदस्य प्रथमपादस्य द्वितीयपादस्य च मध्ये आवृत्तिः इति आदिमध्यपादगतं मध्यपदयमकम्; उत्तरार्द्धे तु 'कलङ्क' पदस्य तृतीय चतुर्थपादयोर्मध्ये आवृत्तिः इति मध्यान्तपादगतं पदयमकम् ।

पादद्वयगतस्य अन्तपदयमकस्योदाहरणम्—

जहुर्वसन्ते सरसीं न वारणाः
बभुः पिकानां मधुरा नवारणाः ।
रसं च का मोहन कोविदारकम्
विलोयन्ती बकुलान् विदारकम् ॥ ३९ ॥

जहुरिति—वारणाः हस्तिनः वसन्ते सरसीम् सरः न जहुः तत्यजुः । पिकानाम् कोकिलानाम् मधुराः मनोहराः नवाः नूतनाः रणाः ध्वनयः बभु शुशुभिरे । एवम् मोहने परचित्तहरणे कोविदा कुशला का रमणी बकुलान् बकुलाख्यवृक्षविशेषान् विलोकयन्ती पश्यन्ती कं रसम् विदारकम् विगतपुत्रम् सपत्नीवति तथा न आर मास सन्तानशून्यायाः स्त्रियः सुरतश्रमसहनभयेन सर्वमेव रसं अनुबभूवेति भावः यद्वा मोहन कोविदा का मोहनपतिका
॥ ~ ॥ [illegible]

स्त्री बकुलान् पश्यन्ती विदारकम् हृदय विदारणकरम् कथं रसम् न याप मर्त्ता एव वियोगिन्यः बकुलपुष्पविकासे पूर्णाम् विमल-म्मथशृङ्गारावस्थामनुबभूवेति-भावः ।

लक्षण समन्वयः—

अत्र प्रथम द्वितीयपादयोरन्ते 'वरणाः' इति पदस्य आवृत्तिः इति आदिमध्यपादान्तगतं पदयमकम् । एवमपरेऽर्धे 'विदारक' पदस्य तृतीय चतुर्थपादयोरन्ते आवृत्तिः इति मध्यान्त्यपादान्तगतं पदयमकम् ।

आद्यन्तयमकोदाहरणम्—

वरणाः प्रसून निकरा वरणाः
मलिना वहन्ति पटली मलिनाम् ।
तरवः सदाऽत्र शिखिजारवः
सरसञ्च भाति निकटे सरसः ॥ ४० ॥

वरणा इति—प्रसूनानाम् पुष्पाणाम् निकराः समूह एव आवरणम् येषाम् ते वरणाः तथाभूताः तरवः वृक्षाः अलिनाम् भ्रमराणाम् मलिनाम् कृष्णवर्णाम् पटलीम् समुदायम् वहन्ति दधति । तथा अत्र शिखिनः तस्य मयूरजातेः मयूर निकरस्येत्यर्थः रवः केकावाणी सरसः सरोवरस्य निकटे, सदा सरसः मधुरः भाति प्रतिभाति ।

लक्षण समन्वयः—

अत्र 'वरण, मलिन, तरु, सरसं' पदानां क्रमेण चतुर्णां पादानामादौ अन्ते चावृत्तिः इति पादाद्यन्तगतं पदयमकम् ।

द्वितीयचतुर्थपादान्तगत पदयमकस्योदाहरणम्—

यथा यथा द्विजिह्वस्य विभवः स्यान्महत्तमः ।

तथा तथास्य जायेत स्पर्द्धयेव महत्तमः ॥ ४१ ॥

यथेति—द्विजिह्वस्य दुर्जनस्य यथा यथा विभवः ऐश्वर्यम् महत्तमः अतिशयेन महान् भवति तथा तथा अस्य दुर्जनस्य तमः पापम् मालिन्यगुणसामान्येन पापस्य तमसा व्युपदेशः उक्तञ्च— "मालिन्यं व्योम्नि पापे" इति, स्पर्द्धया इव विभववृद्धिजन्येर्ष्यया इव महत् गुरु जायेत भवेत् ।

लक्षण समन्वयः—

अत्र 'महत्तम' पदस्य द्वितीयचतुर्थपादयोरन्ते आवृत्ति इति द्वितीयचतुर्थपादान्तगतं पदयमकम् ।

संयुतासंयुतावृत्तिपदयमकस्योदाहरणम्—

दास्यति दास्यति कोपा-
दास्यति सति कर्करान् शापम् ।
भवति भवति ह्यनर्थो
भवतिमितस्तेन वटुक ! त्वम् ॥ ४२ ॥

दास्यति—हे वटुक ! बालक ! भवति त्वयि कर्करान् पाषाणखण्डानि आ आसमन्तात् अस्यति सति क्षिपति सति दासी अतिकोपात् महाक्रोधाभिभूता सतीत्यर्थः शापम् दास्यति । हि निश्चयेन तेन शापेन अनर्थः अनिष्टोत्पत्तिः भवति, तेन तस्माद् कारणात् त्वम् स्तिमितः स्थिरः भव चापल्यं त्यजेतिभावः ।

लक्षण समन्वयः—

अत्र 'दास्यति' इति पदस्य प्रथमपादादौ आवृत्तिः व्यवधायक वर्णान्तराप्रवेशेन संयुता द्वितीयपादादौ तु 'कोपात्' इति पदेन व्यवहितत्वात् असंयुता; एवं 'भवति' इति पदस्य तृतीयपादादौ आवृत्तिः संयुता, चतुर्थपादादौ तु 'अनर्थ' पदात्पूर्वा

स्ववीसितत्वात् असंयुता इति [एकत्रैव संयुताऽसंयुता इति पदयमकम् ।

पदयमकोदाहरणान्तरम्—

कुण्डे तिमिभयादत्र करेणूनां न दीव्यति ।
न दीव्यति करेणूनां प्राणिनां गणनापि का ? ४३

कुण्डेति–अत्र अस्मिन् नदीव्यतिकरे नदीद्वय सङ्गमे करेणूनाम् हस्तिनाम् कुम्भ समूहः न दीव्यति क्रीडति । अणूनाम् ह्रस्वपरत्वात् अत क्षुद्राणाम् प्राणिनाम् गणना अपि का न स्यादित्यर्थः ।

लक्षण समन्वयः—

अत्र 'करेणूनाम्' इति पदस्य द्वितीयपादस्यादौ तृतीय पादस्य चान्ते आवृत्तिः मध्यव्यवधानतया असंयुता; 'न दीव्यति' इत्यस्य द्वितीयपादस्यान्ते तृतीयपादस्यादौ आवृत्तिः निर्व्यव-धानतया संयुता इति संयुताऽसंयुतावृत्ति पदयमकम् ।

अथ वर्णयमकम्—

गंगाम्बुधवलांगाभो मुमुक्षुध्यानगोचरः ।
पापार्तिहरणायास्तु स सज्ञानो जिनः सताम् ॥४४॥

गङ्गेति–गङ्गायाः इदम् गाङ्गम्, गाङ्गम् यत् अम्बुजलम् तद्वत् धवला शुभ्रवर्णा अङ्गानाम् करचरणादीनाम् आभा कान्तिः यस्य सः मुमुक्षूणाम् मुक्त्यभिलाषिणाम् पुरुषाणाम् ध्यानस्य समाधेः गोचरः विषयः समाधिद्वारैव यस्य साक्षात्कारो भवति इत्यर्थः ज्ञानेन प्रमाण इति भावः सहितः महान् सः प्रसिद्धः जिनः बुद्धदेवः सताम् सज्जनानाम् पापार्तिहरणाय पापदुःखविनाशनाय अस्तु भवतु ।

लक्षण समन्वयः—

अत्र 'मा, मु, पा, म' वर्णानां क्रमेण चतुर्णां पादानामारम्भे द्विरुक्तिः अव्यवहितत्वेन संयुता इति संयुतावृत्ति पादादिगतं वर्णयमकम् ।

असंयुतावृत्ति-वर्णयमकोदाहरणम्—

जगदात्मकीर्तिशुभ्रं जनयन्नुद्दामधामदोः परिघः ।
जयति प्रतापपूषा जयसिंहः क्ष्माभृदधिनाथः ॥४५॥

जगदिति—उद्दामम् अत्युग्रम् धाम तेजः यस्य तादृशः दोः भुजः एव परिघः कपाटावरोधकः 'अर्गलम्' इति प्रसिद्धः दण्डविशेषः यस्य सः प्रतापेन पूषा सूर्यः क्ष्माभृतां भूपतीनाम् अधिनाथः अधिपतिः जयसिंह जगत् आत्मनः कीर्त्या यशसा शुभ्रम् जनयन् कुर्वन् जयति सर्वानतिक्रम्य तिष्ठति ।

लक्षण समन्वयः—

अत्र 'ज' वर्णस्य प्रत्येकपादादौ सान्तराला आवृत्तिः इति असंयुतावृत्ति पादादिगतं वर्णयमकम् ।

संयुतासंयुतावृत्ति वर्णयमकोदाहरणम्—

मा मा कारयते रामा सा सा मुदितमानसा ।
या या मदारुणच्छाया नानाहेलामया नना ॥४६॥

मामिति—मा मा स्त्री मुदितमानसा प्रसन्नचित्ता सती माम् आकारयते आह्वयति । या या मदेन मदिरा पानेन अरुणा रक्ता छाया कान्तिः यस्याः तादृशी तथा नानाहेलामयम् विविधविलास विभ्रमरूपम् आननम् मुखम् यस्याः तथे स्त्रा वर्तते इतिशेषः ।

लक्षण समन्वयः—

अत्र 'मा, मा' 'सा सा' 'या या' 'ना ना' इत्यादिभिः संयुता, प्रत्येकपादान्ते पठितानां तु तेषामावृत्तिः असंयुता इति संयुताऽसंयुतावृत्ति वर्णयमकम् ।

अथ अर्थालङ्कारेषु स्वभावोक्तेः प्रथमतया लक्षणमाह—

स्वभावोक्तिः पदार्थस्य सक्रियस्याक्रियस्य वा ।
जातिर्विशेषतो रम्या हीनत्रस्तार्भकादिषु ॥ ४७ ॥

स्वभावोक्तिरिति—क्रिया गमनादि व्यापारः तेन सहितस्य चेतनस्येतिभावः अक्रियस्य गमनादि व्यापार रहितस्य अचेतनस्य पदार्थस्य वस्तुनः स्वभावस्य उक्तिः वर्णनम् जाति कथ्यते । हीनाः हीनाः नीचजातिभाजः च, त्रस्ताः भीताः प्राणिनः, अर्भकाः बालकाः एतत्प्रभृतिषु एतादृशविषये इत्यर्थः स्वभावोक्तिः विशेषतः रम्या रमणीया जातिः भवति । यद्यपि वस्तुमात्र स्वभावर्णनमपि जातिरेव तथापि भीतबालकादिषु जातिभाजाम् स्वभावस्य वर्णनमतीव मनोहरमिति जातिरुदाहर्तुमुपपादयति ।

तदुदाहरणम्—

बर्हावली बहलकान्तिरुचो विचित्र-
भूर्जत्वचा रचित चारुदुकूललीलाः ।
गुञ्जाफल ग्रथितहारलताः सहेलं
खेलन्ति खेलगतयोऽत्र वने शबर्यः ॥४८॥

बर्हेति—अत्र अस्मिन् वने बर्हावलीभिः मयूरपिच्छश्रेणिभिः बहला मधुरा या कान्तिः तया रोचन्ते विलसन्ति इति तादृश्यः विचित्रया नानारूपया भूर्जत्वचा रचिता कल्पिता चारुदुकूलस्य मनोहरपट्टवस्त्रस्येव लीला शोभा याभिः ताः गुञ्जाफलैः ग्रथिता गुम्फिता हारलता हाररूपा वल्ली याभिस्तथोक्ताः खेलगतयः सविभ्रमगमनाः शबर्यः भिल्लाङ्गनाः खेलन्ति क्रीडन्ति ।

लक्षण समन्वय —

अत्र हीनानां (अधमजातिभाजाम्) शबरीणां स्वदशायो- - -

ग्यतानुरूपमशृङ्गपिङ्ग-मूर्तित्वम्, गुआफलवमकल्पित मालाधारण स्वभावस्य वर्णनात् जातिरलङ्कारः ।

उदाहरणान्तरम्—

आरत्तनित्तथोरणि भीपणव अणुकरा कुरंगच्छि ।
उल्लसि अवीण भुअवण विणिवेसो दशमुहो एसो ॥४९॥

संस्कृतम्—

आरक्तनेत्रश्रेणि भीपणवदनोत्करः कुरंगाक्षि ।
उल्लसित विंशति भुजवन विनिवेशो दशमुख एषः ।

आरक्तेति–कुरङ्गवत् अक्षिणी नेत्रे यस्याः तत्सम्बुद्धौ हे कुरङ्गाक्षि ! आसमन्तात् रक्तानाम् नेत्राणाम् श्रेण्या भीषणः भयदः वदनोत्करः मुखसमूहः यस्य ताहशः उल्लसिताः प्रकाशिताः वा यस्मिन् तथोक्तः एष पुरोवर्ती दशमुखः रावणः वर्तते इति शेषः ।

लक्षण समन्वय.—

अत्र स्वभावतो भयङ्करमूर्तेः रावणस्य तत्स्वाभाविक, भीषणतावर्द्धक, रक्तनेत्रत्व, भीपणानेकमुखत्व, लसद्विंशतिभुजत्वानां वर्णनात् स्वभावोक्तिः ।

उपमालक्षणम्—

उपमानेन साहश्यमुपमेयस्य यत्र सा ।
प्रत्यया व्यय तुल्यार्थसमासै रुपमा मता ॥ ५० ॥

उपमानेनेति–यत्र प्रत्ययैः क्यच-क्यङ्प्रभृतिभिः अव्ययैः इव-यथादिभिः, तुल्यार्थैः समसमानादि शब्दैः, बहुव्रीहि प्रभृतिभिः ... प्रासङ्गिकस्य मुखादेः उपमानेन अप्रासङ्गिकेन चन्द्रादिना साहश्यम् तुल्यता सा उपमा मता कथिता ।

उदाहरणम्—

गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते
यस्याः पूर्णमृगाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।
यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया
तां कुन्दाग्रदतीं त्यजन्नपि जिनपती राजीमतीं पातु वः ॥५१॥

गत्येति—या विभ्रमेण विलासेन मन्दया मन्थरया गत्यागमनेन प्रतिपदम् प्रतिचरणन्यासम् राजहंसायते राजहंसी इव आचरति । यस्याः आननम् मुखम् सदैव नित्यमेव पूर्णमृगाङ्कमण्डलमिव पूर्णिमाचन्द्रबिम्बम् इव श्रीमत् शोभायुतमस्ति । यस्या नेत्रयुगलं च नयनद्वयमपि श्रिया शोभया नीलोत्पलानि इन्दीवराणि अनुकरोति सम्स्पृशति । कुन्दानि अग्राः श्रेष्ठाः रमणीयाः इति भाव दन्ता यस्याः तथोक्तम् ताम् राजीमतीम् तन्नाम्नी स्त्रियम् त्यजन् जिनपतिः बुद्धः वः युष्मान् पातु रक्षतु ।

लक्षण समन्वय –

अत्र राजीमती, तदानन, नयनद्वय, दन्तरूपाणाम् उपमेयानाम् क्रमेण राजहंस, चन्द्रमण्डल, नीलकमलरूपैः उपमानैः सहसादृश्यम्; तच्च ' राजहंसायते ' इति पदङ्ग प्रत्ययेन; ' इव ' इत्यव्ययेन, ' अनुकरोति ' इति तुल्यार्थक्रियया- प्रकटीक्रियते इत्युपमालङ्कारः ।

उदाहरणान्तरम्—

चन्द्रवद्वदनं तस्या नेत्रे नीलोत्पले इव ।
पक्वबिम्बं हसत्योष्ठः पुष्पधन्वधनुर्भ्रुवः ॥ ५२ ॥

चन्द्रवदिति—पुष्पम् धनुः यस्य सः पुष्पधन्वा कामदेवः तस्य धनुः इव भ्रूः यस्याः तथोक्तायाः तस्याः राजीमत्याः तन्नाम्न्याः

स्याःस्त्रियः वदनम् मुखम् चन्द्रवत् चन्द्रेण तुल्यम् अस्तीति शेषः नेत्रे नीलोत्पले नीलकमले इव स्तः, तथा तस्याः ओष्ठः पक्वबिम्बम् पक्वबिम्बाफलम् हसति तिरस्करोति, यद्वा धातूनामनेकार्थत्वमाश्रित्य 'हसति' इत्यस्य अनुकरोतीति तुल्यार्थता एव स्वीकार्या, अन्यथा अन्यटीकाकारैरङ्गीकृता अस्य तुल्यार्थकोदाहरणता न स्यात् ।

लक्षण समन्वय –

अत्र उपमेयानाम् मुख-नेत्रौष्ठानाम् उपमेयैः चन्द्रनीलकमल परिणतबिम्बैः सह सादृश्यम् क्रमेण 'वत्' इति प्रत्ययेन, 'इव' इत्यव्ययेन, 'हसति' इति तुल्यार्थपदेन वर्ण्यते इति उपमा ।

उदाहरणान्तरम्–

मअ भरिअमाणसस्स वि णिच्चं दोषा अरस्स ससिण व्व ।
तुह विरहे तीइ मुहं संकुइअ सुहअ कुमुअं च ॥५३॥
(मद भरितमानस्यापि नित्यं दोषाकरस्य शशिन इव ।
तव विरहे तस्या मुखं संकुचितं सुभग कुमुदं च ॥)

मदेति–हे सुभग ! मदेन दर्पेण भरितं पूर्णम् मानसम् चित्तम् यस्य तस्य पक्षे मदः कस्तूरी ('मदोरेतसि कस्तूर्याम्' इति मेदिनी) तद्विशिष्टः मदः मृगः इत्यर्थः तेन रितं पूर्णम् मानसम् अन्तःकरणम् यस्य तथोक्तस्य दोषाकरस्यापि नानादोष युक्तस्यापि पक्षे रात्रिजनकस्यापि शशिनः चन्द्रस्य इव तव विरहे वियोगे तस्याः मुखम् कुमुदम् इव संकुचितम् भवति इति भावः

लक्षण समन्वयः—

अत्र सुभग-मदभरितमानसमुखरूपयोः उपमेययोः चन्द्र-कुमुद-रूपयोः उपमानयोः सह सादृश्यम् 'इव' इत्यव्ययेन वर्ण्यते इति उपमालङ्कारः ।

इतरेतरोपमाया उदाहरणम्-

तं णमह वीअराअं जिणिंदमुद्दंकिअदेहआआरम्
जस्स मणं व सरीरं मणं सरीरं व सुपसण्णम् ॥ ५४ ॥
(तं नमत वीतरागं जिनेन्द्रमुद्राङ्कितदेहाकारम् ।
यस्य मन इव शरीरं मनः शरीरमिव सुप्रसन्नम् ॥)

तमिति–हे भव्याः! इति अध्याहार्यम् वीतरागम् विगता रागादयो दोषाः यस्मात् तम् आदिजिनम् (कषायः दुःखोदयः) वीतरागमिति जिनेन्द्रमुद्राङ्कितदेहाकारम् यस्य मनः शरीरम् इव सुप्रसन्नम् । यस्य शरीरम् मनः इव मनश्च शरीरम् इव सुप्रसन्नम् अस्ति इति भावः ।

लक्षण समन्वय—

अत्र पूर्वम् शरीरमुपमेयम्, मनः उपमानम्; पश्चात् मनः उपमेयम्, शरीरम् उपमानम्; इति मनः शरीरयोः परस्परम् उपमानोपमेय भावात् उपमेयोपमालङ्कारः तदुक्तं दर्पणे:—" पर्यायेण द्वयोस्तदुपमेयोपमा मता " इति ।

अनन्वयोपमाया उदाहरणम्—

ये देव! भवतः पादौ भवत्पादा निवाश्रिताः ।
ते लभन्तेऽद्भुतां भव्यां श्रियं त इव शाश्वताम्॥५५॥

य इति–हे देव! ये जनाः भवतः पादौ चरणौ भवत्पादौ इव आश्रिताः ते जनाः ते इव अद्भुताम् आश्चर्यकारिणीम्, भव्याम्, कल्याणकारिणीम्, शाश्वतीम् अविनाशिनीम् श्रियम् सम्पत्तिम् लभन्ते प्राप्नुवन्ति ।

लक्षण समन्वयः—

अत्र 'पादौ' इत्यस्यैव उपमेयत्वम् उपमानत्वम् च एवम् उत्तरार्द्धे 'ते' इत्यस्यैव उपमेयत्वम् उपमानत्वम् च इति अनन्वयः तल्लक्षणं तु दर्पणे उक्तम्—" उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ।

अनेकोपमेयोपमाया उदाहरणम्—

आलोकनं च वचनं च निगूहनं च
यासां स्मरन्नमृतवत् सरसं कृशस्त्वम् ।
तासां किमंग पिशितास्त्र पुरीषपात्रं
गात्रं विचिन्त्य सुदृशां न निराकुलोऽसि ? ॥५६

आलोकनमिति—हे सखे ! इति सम्बोधनम् यासाम् स्त्रीणाम् अमृतवत् अमृतमिव सरसं शान्तिप्रदम् आलोकनम् दर्शनम्, वचनम् भाषणम्, निगूहनम् आलिङ्गनम् च स्मरन् त्वम् कृशः असि । अङ्ग भोः तासाम् सुदृशाम् सुलोचनानाम् गात्रम् शरीरम् पिशितास्त्र पुरीषाणाम् मांसरुधिरविष्ठानाम् पात्रम् स्थानम् अस्ति इति विचिन्त्य विचार्य निराकुलः व्याकुलतारहितः न असि ? अपि तु निराकुलो भवितुं अर्हसि इति भावः ।

लक्षण समन्वयः—

अत्र वचनालोकन निगूहनानां पुरुषोक्तानां मेकेन उपमानेन अमृतेन सह सादृश्यम् इति अनेकोपमेयोपमाख्यः उपमालङ्कारः ।

बहूनामुपमानामुदाहरणम्—

कलेव चन्द्रस्य कलङ्कमुक्ता
मुक्तावली चोरुगुणप्रपन्ना ।
जगत्त्रयस्याभिमतं ददाना

हिमम् इव धवला शुभ्रा अस्ति, ते वाचः गिरः चन्द्रकला इव अति निर्मलाः सन्ति, ते दाक्ष्यम् चातुर्यम् ध्वाङ्क्षस्य काकस्य इव अस्ति, ते वक्षः उरः नभः आकाशम् इव विपुलम् विस्तृतम् अस्ति

लक्षण समन्वयः—

अत्र, 'हिमम्' इति उपमानं नपुंसकम्, 'कीर्तिः' इति उपमेयस्य तु स्त्रीत्वम् इति लिङ्गभेदः। 'चन्द्रकला' इति उपमानस्य एकवचनता, 'वाचः' इति उपमेयस्य बहुवचनता इति वचनभेदः। उपमानस्य काकगतदाक्ष्यस्य नृपगतदाक्ष्यापेक्षया अतीव हीनत्वात् हीनोपमा। उपमानस्य नभसः विपुलतायाः वक्षोऽपेक्षया विपुलतापेक्षया अत्यधिकत्वात् अधिकोपमा।

शुनीयं गृहदेवीव प्रत्यक्षा प्रतिभासते।
खद्योत इव सर्वत्र प्रतापश्च विराजते ॥ ६० ॥

शुनीति—इयम् शुनी प्रत्यक्षा दृष्टिविषयीभूता गृहदेवी गेहदेवता इव प्रतिभासते प्रतिभासते शोभते। प्रतापश्च सर्वत्र खद्योत इव ज्योतिरिङ्गण इव विराजते।

लक्षण समन्वयः—

अत्र 'गृहदेवी' इति उपमानस्य 'शुनी' इति उपमेयापेक्षया महती अधिकता इति अधिकोपमा। एवं 'खद्योतः' इति उपमानस्य 'प्रतापः' इति उपमेयापेक्षया अतीव हीनत्वम् इति हीनोपमा

उपमानस्य हीनाधिक विशेषणता मुदाहरति—

सफेनपिण्डः प्रोद्यर्मिरब्धिः शार्ङ्गीव शङ्खभृत्।
स्रोतन्मदः करी वर्षन् विद्युत्वानिव वारिदः ॥६१॥

सफेनेति—सफेनपिण्डः फेनपिण्डयुतः प्रोद्यर्मिः उद्गततरङ्गः अब्धिः समुद्रः शङ्खं बिभर्ति तादृशः शार्ङ्गी विष्णुरिव वर्तते।

अंगस्य स्मरस्य मदः मदजनकस्य चन्द्रात् तारकः वशी दमी वर्धन-मानः पूर्वं त्रिपुरारिम् अतिदृढसदः शान्तिदः शिवः इव शोभते इति भावः ।

लक्षण समन्वयः—

अत्र पूर्वार्द्धे 'शान्तिदः' इति उपमेयस्य 'मदनविजयी' 'अतिदृढ़ि' इति विशेषणद्वयम्, उपमानस्य 'शार्ङ्गी' इत्यस्य तु 'शिवत्व' इति एकमेव विशेषणमिति हीनविशेषणता । एवम् उत्तरार्द्धे उपमेयस्य 'वशी' 'शान्तमदः' इति एकं विशेषणम्, उपमानस्य 'शान्तिदः' इत्यस्य तु 'वर्धन' 'त्रिपुरारान्' इति विशेषणद्वयम् इति अधिक विशेषणता ।

लिङ्गभेदमुदाहरति—

मुखं चन्द्रमिवालोक्य देवाल्हादकरं तव ।
कुमुदन्ति मुदाक्षीणि क्षीण मिथ्यात्वस्य संपदाम्॥६२

मुखमिति—हे देव ! क्षीणा नष्टा मिथ्यात्वस्य अतत्त्वश्रद्धायाः सम्पत् प्रकर्षः येषां तेषाम् सम्यग्दृष्टीनाम् भव्यानाम्, तत्त्वदर्शिनां वा पुरुषाणाम् इत्यर्थः अक्षीणि नेत्राणि तव चन्द्रम् इव आह्लादकरम् हर्षप्रवर्धनकरम् मुखम् आलोक्य दृष्ट्वा मुदा आनन्देन कुमुदन्ति कुमुदानि इव आचरन्ति विकसितानि भवन्ति इति भावः ।

लक्षण समन्वयः—

अत्र 'मुखम्' इति उपमेयस्य नपुंसकत्वम्, 'चन्द्रम्' इति उपमानस्य पुंस्त्वम् इति लिङ्गभेदेऽपि उपमा निर्दोषा ।

समासे उपमेयोपमानयोः लिङ्गभेदमुदाहरति—

निजजीवितेश करजाग्रकृत-
क्षतपङ्क्तयः शुशुभिरे सुरते ।

कुपितस्मरप्रहित बाण गण-
व्रणजर्जरा इव सरोजदृशः ॥ ६३ ॥

निर्जेति-सरोजे कमले इव दृशौ गमने यस्याः तादृशाः स्त्रियः सुरते पतिसङ्गमे निजजीवितेशस्य स्वप्राणवल्लभस्य वारजानाम् नखानाम् अग्रैः कृतानाम् क्षतानाम् पङ्क्तयः कुपितस्मरेण क्रुद्ध कामदेवेन प्रहितैः क्षिप्तैः बाणः गणैः बाणसमूहैः ये व्रणाः क्षतानि तेषाम् जर्जराः चिन्हानि इव शुशुभिरे शोभन्ते स्म ।

लक्षण समन्वयः—

अत्र 'सरोज दृशः' इत्यत्र उपमानवाचकस्य 'सरोज' शब्दस्य नपुंसकत्वम्, उपमेयवाचकस्य 'दृश' इत्यस्य स्त्रीत्वम् इति समासगता भिन्नलिङ्गता न दोषावहा ।

रूपके लिङ्गभेदमुदाहरति—

हस्ताग्र विन्यस्त कपोलदेशा
मिथो मिलत्कङ्कण कुण्डलश्रीः ।
सिषेच नेत्रस्रवदश्रुधारा
दोः कन्दलीं काचिदवश्यनाथा ॥ ६४ ॥

हस्तेति-अवश्यनाथा अवशीकृतभर्तृका काचित् स्त्री हस्तस्य अग्रे अग्रभागे विन्यस्तः समर्पितः कपोल देशः यया सा अस्मादेव कारणात् मिथः अन्योन्यम् मिलन्ती कङ्कणकुण्डलयोः करकर्णाभरणयोः श्रीः प्रतिबिम्बरूपा शोभा यस्याः तथोक्ता सती नेत्राभ्याम् नयनाभ्याम् स्रवन्ती निर्गच्छन्ती अश्रुधारा अश्रु जलेन दोः भुज एव कन्दली लता ताम् सिषेच सिञ्चति स्म ।

लिङ्गस्य असमन्वयः—

अत्र "दोः कन्दली" इत्यस्मिन् रूपके 'दोः' इत्यस्य पुंस्त्वम् 'कन्दली' इत्यस्य स्त्रीत्वम् इति लिङ्गभेदः न रूपकहानिकरः।

प्रतिवस्तूपमायां लिङ्गभेदस्योदाहरणम्—

यदुवीरोऽप्यसावेको यदुवंशेऽद्भुतोऽभवत्।
किं केतक्यां दलानि स्युः सुरभीण्यखिलान्यपि ६५

यदुवीर इति—यदवः वीराः शूराः यत्र तस्मिन् यदुवंशे यदुकुले एकः केवलः असौ पुरुषः अद्भुतः अलौकिक गुणान्वितः अभवत्। केतक्याम् नद्याश्चायां लतायाम् अखिलानि सर्वाणि दलानि पत्राणि सुरभीणि मनोमोदकगन्धयुक्तानि स्युः भवेयुः किम्? नैव इति भावः।

लिङ्गस्य समन्वयः—

अत्र उपमेयस्य "यदुवीरस्य" पुंस्त्वम्, तस्योपमानस्य 'केतकी' इत्यस्य तु स्त्रीत्वम् इति लिङ्गभेदः वक्ष्यमाणलक्षणायाः प्रतिवस्तूपमाया न विघातकः।

रूपकालङ्कार लक्षणम्—

रूपकं यत्र साधर्म्यादर्थयोरभिदा भवेत्।
समस्तं वाऽसमस्तं वा खण्डं वाऽखण्डमेव वा ॥६६॥

रूपकमिति—यत्र साधर्म्यात् समानधर्म विशिष्टत्वात् अर्थयोः सांसङ्गिकासांसङ्गिकयोः वस्तुनोः उपमानोपमेययोः वा अभिदा भेदाभावः एकत्वम् इत्यर्थः भवेत् तत् रूपकम् भवति। तच्च रूपकं समस्तम् समासोपेतम्, असमस्तम् तद्भिन्नम्, खण्डम् खण्डितम्, अखण्डं अखण्डितम् चेति चतुर्विधः।

समस्तरूपकोदाहरणम्—

कीर्णान्धकाराऽलकशालमाना
निबद्धतारास्थिमणिः कुतोऽपि ।
निशापिशाची व्यचरद्दधाना
महान्त्युलूकध्वनि फेत्कृतानि ॥ ६७ ॥

कीर्णेति—कीर्णाः इतस्ततः क्षिप्ताः अन्धकारम् एव अलकाः चूर्णकुन्तलाः तैः शालमाना शोभमाना निबद्धाः हारभावेन परिहिता ताराः एव अस्थीनि तान्येव मणयः यया तादृशी, महान्ति उलूकानाम् ध्वनयः एव फेत्कृतानि फेत्कारशब्दाः तानि दधाना धारयन्ती निशा एव पिशाची राक्षसी कुतः अपि कस्मादपि अज्ञातनाम्नः स्थानात् व्यचरत् विचचार ।

लक्षण समन्वयः—

अत्र कृष्णत्वरूपसाधर्म्यात् अन्धकारस्य अलकैः सह, शुक्लगोलाकारतारूपसाधर्म्यात् ताराणां मणिभिः सह, भयङ्करत्वरूपसाधर्म्यात् निशायाः पिशाच्या सह, कटुत्वाशुभसूचकत्वरूपसमानधर्म विशिष्टत्वात् उलूकध्वनेः फेत्कारैः सह अभेद इति रूपकम् तच्च समासयुक्तम् इति समस्तम् ।

असमस्तरूपकोदाहरणम् —

संसार एष कूपः सलिलानि विपत्ति जन्मदुःखानि ।
इह धर्मएव रज्जु स्त स्मादुद्धरति निर्मग्नान् ॥६८॥

संसार इति–एष संसारः कूपः अस्ति, इह संसारकूपे विपत्तिजन्मदुःखानि सलिलानि जलानि सन्ति, धर्मः एव रज्जुः निर्मग्नान् बुडितान् पुरुषान् तस्मात् संसाररूपात् कूपात् उद्धरति रक्षति ।

लक्षण समन्वयः—

अत्र दुःखदातृत्वादि साधर्म्यात् संसारस्य कूपेन, अविवेकदायकत्वात् दुःखानाम् पङ्किलैः, अवलम्बनप्रदत्वसाधर्म्यात् धर्मस्य रज्वा सह अभेद इति रूपकम् तच्च समासाभावात् असमस्तम् ।

समस्तरूपकोदाहरणम्—

अधरं सुखेन नयनेन रुचिं
सुरभित्व गन्धमिव नासिकया ।
नव वर्णिनी वदन चन्द्रमसः
तरुणा रसेन युगपन्निपपुः ॥ ६९ ॥

अधरमिति—तरुणाः युवानः रसेन प्रीत्यभिलाषेण नवः वर्णिन्याः नवीन कान्तायाः वदनचन्द्रमसः मुखचन्द्रस्य अधरम् ओष्ठम् मुखेन, रुचिम् छविम् नयनेन नेत्रेण आघ्रातमिव कमलमन्वधि इव सुरभित्वम् सौरभम् इष्ट गन्धमित्यर्थः नासिकया युगपत् एकदैव निपपुः पीतवन्तः ।

लक्षण समन्वयः —

अत्र आह्लादकत्वसाधर्म्यात् मुखस्य चन्द्रेण सह एकताम् इति रूपकम्, मुखचन्द्रस्य 'अधरं मुखेन' 'नयनेन रुचिम्' 'सुरभित्वं नासिकया' इति खण्डनाश खण्डम् ।

असमस्तरूपकोदाहरणम्—

ज्योत्स्नया धवली कुर्वन् नुर्वी सकुल पर्वताम् ।
निशा विलास कमलमुदेति स्म निशाकरः ॥ ७० ॥

ज्योत्स्नयेति—निशायाः रात्रेः विलासाय रमणार्थम् कमलम् निशाकरः चन्द्रः ज्योत्स्नया चन्द्रिकया कुलपर्वतैः महेन्द्रादिभिः सहिताम् उर्वीम् पृथ्वीम् धवली कुर्वन् शुभ्रीकुर्वन् उदेति स्म ।

लक्षण समन्वयः—

अत्र मनोरञ्जनत्वादि साधर्म्यात् निशाकरस्य निशाविला[illegible]
कमलेन सह अभेद इति रूपकम्, निशाकरस्य अखण्डस्यैव (स[illegible]
स्यैव) निशाविलासकमलता इति साद्गनात् च अखण्डम्।

प्रतिवस्तूपमालक्षणम्-

अनुपात्ता विवादीनां वस्तुनः प्रतिवस्तुना ।
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ॥ ७१ ॥

अनुपात्तेति–यत्र इवादीनाम् इव यथावमुति सा[illegible]
बोधकशब्दानाम् अनुपात्तौ अकथने वस्तुनः सामाङ्गकस्य प[illegible]
वस्तुना सादृश्येन वस्तुना अप्राप्तिकेनेत्यर्थः सह साम्यम् सा[illegible]
इदम् प्रतीयेत अवगम्येत सा प्रतिवस्तूपमा ।

उदाहरणम्-

यद्वीर्येऽप्यसावेको यदुवंशध्वतोऽभवत् ॥ ७२ ॥

[illegible]

लक्षण समन्वयः—

अत्र सादृश्यवाचकानाम् इवादिशब्दानामपात्तेऽपि यदुवंश[illegible]
[illegible], वीरेणाप [illegible], [illegible] सह सा[illegible]
प्रतीयते इति प्रतिवस्तूपमा ।

भ्रान्तिमल्लक्षणम्—

वस्तुन्यन्यत्र कुत्रापि तत्तुल्यस्यान्यवस्तुनः ।
निश्चयो यत्र जायेत भ्रान्तिमान् सम्मतो यथा॥७[illegible]

वस्त्विति–[illegible]
[illegible]
[illegible]

उदाहरणम्—

हेमकमलं ति वअणे णअणे णीलुप्पलं ति पसयच्छि ।
कुसुमं ति तुज्झ हसिए णिवडइ भमराणं रिञ्छोली ॥७४॥
(हेमकमलमिति वदने नयने नीलोत्पलमिति प्रसृताक्षि ।
कुसुममिति तव हसिते निपतति भ्रमराणां श्रेणिः ॥)

हेमकमलमिति—हे प्रसृताक्षि ! विशाललोचने ! प्रिये ! तव वदने मुखे हेमकमलं सुवर्णकमलम् इति, नयने नेत्रे नीलोत्पलम् नीलकमलम् इति, हसिते हास्ये कुसुमम् पुष्पम् अस्ति इति मत्वा रिञ्छोली भ्रमराणाम् श्रेणिः पङ्क्तिः निपतति ।

लक्षण समन्वयः—

अत्र भ्रमराणां सुरभिगन्ध विशिष्टे मुखे तादृशस्य तद्भिन्नस्य हेमकमलस्य निश्चयः, नीलस्य नेत्रे तादृशस्य तद्भिन्नस्य नीलकमलस्य निश्चितिः, श्वेततायुते हासे तादृशस्य तद्भिन्नस्य कुसुमस्य प्रतीतिः इति भ्रान्तिमान् अलङ्कारः ।

आक्षेपलंकारोदाहरणम्—

उक्तिर्यत्र प्रतीतिर्वा प्रतिषेधस्य जायते ।
आचक्षते तमाक्षेपालङ्कारं विबुधा यथा ॥ ७५ ॥

उक्तिरिति—यत्र प्रतिषेधस्य निषेधस्य उक्तिः साक्षात् कथनम् वा प्रतीतिः अर्थद्वारा ज्ञानम् जायते विबुधाः पण्डिताः तम् आक्षेपालङ्कारम् आचक्षते कथयन्ति ।

उदाहरणम्—

इन्द्रेण किं यदि स कर्ण नरेन्द्र सूनु
रैरावतेन किमहो यदि तद्द्विपेन्द्रः ।

दम्भोलिनाप्यलमयं यदि तत्प्रतापः
स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरी

इन्द्रेणेति–यदि चेत् सः कर्ण नरेन्द्रस्य पुत्रः जयसिंहदेवः अस्ति तर्हि इन्द्रेणः किम नहि भावः। यदि तस्य द्विपेन्द्रः श्रेष्ठः हस्ती वर्तते अते इन्द्रहस्तिना किम नकिमपि प्रयोजनमिति ... जयसिंहदेवस्य प्रतापः अस्ति तर्हि दम्भोलिन न कोऽप्यर्थः इत्यर्थः। यदि सा तस्य पुरी स्वर्गः अपि मुधा प्रयोजनशून्य।

लक्षण समन्वय.–

अत्र इन्द्रेरावत दम्भोलिस्वर्गाणां ... पालङ्कारः।

उदाहरणान्तरम्

यस्यास्ति नरक क्रोड निवासं
सोऽस्तु हिमानृतस्तेयतत्परः

यस्येति–यस्य पुरुषस्य नरकस्य ... नृतस्तेयतत्परः हिमादिस्थान...

अत्र नरक

इति नि...

इत्यलङ्कि

तेन

(इच्छन्ति ये न कीर्तिं कुर्वन्ति करुणां क्षणमपि ये नैव ।
ते धनयक्षाइव नराददति धनं मरण समयेपि ॥)

इच्छन्तीति-ये पुरुषाः कीर्तिम् यशः न इच्छन्ति, ये च करुणाम् दयाम् क्षणम् अपि न कुर्वन्ति, धनयक्षाः इव धनरक्षण नियुक्तदेवयोनि विशेषाः इव ते पुरुषाः मरणसमयेपि मृत्युकालेपि धनम् ददति किम् !

उक्तस्य समन्वयः—

अत्र कीर्तिकामनाशून्यैः करुणापराङ्मुखैः पुरुषैः धनं न दीयते इति निषेधस्य प्रतीतेः आक्षेपालङ्कारः ।

संदेहालङ्कारलक्षणम्—

इदमेतदिदं वेति साम्याद्बुद्धिर्हि संशयः ।
हेतुभिर्निश्चयः सोपि निश्चयान्तः स्मृतोयथा ॥७९॥

इदमिति-इदम् एतत् इदम् वा इति बुद्धिः एतत्प्रकार स-न्देहात्मिकं ज्ञानम् संशयः । सोपि संशयः हेतुभिः कारणैः निश्चयः निश्चये परिणमन् निश्चयान्तः स्मृतः कथितः ।

उदाहरणम्—

किं केशपाशः प्रतिपक्षलक्ष्म्याः
किं वा प्रतापानलधूम एषः ।
दृष्ट्वा भवत्पाणिगतं कृपाण-
मेवं कवीनां मतयः स्फुरन्ति ॥ ८० ॥

किमिति-हे नृपते ! इति अध्याहार्यम् भवतः पाणिगतम् हस्तगतम् कृपाणम् खड्गम् दृष्ट्वा कवीनाम् मतयः प्रतिभाः एवम् वक्ष्यमाणरीत्या स्फुरन्ति विलसन्ति—किम् एषः प्रतिपक्षस्य शत्रु

दम्भोलिनाप्यलमयं यदि तत्प्रतापः
स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरी सा ॥७६॥

इन्द्रेणेति—यदि चेत् सः कर्ण नरेन्द्रस्य तदाख्यनृपस्य सूनुः पुत्रः जयसिंहदेवः अस्ति तर्हि इन्द्रेणः किम् नकिमपि फलमिति भावः। यदि तस्य द्विपेन्द्रः श्रेष्ठः हस्ती वर्तते अत्र। तदा ऐरावतेन इन्द्रहस्तिना किम् नकिमपि प्रयोजनमिति भावः। यदि तस्य जयसिंहदेवस्य प्रतापः अस्ति तर्हि दम्भोलिना वज्रेण अपि अलम् न कोऽप्यर्थः इत्यर्थः। यदि सा तस्य पुरी नगरी वर्तते सदा अयम् स्वर्गः अपि मुधा प्रयोजनशून्य।

लक्षण समन्वय—

अत्र इन्द्रैरावत दम्भोलिस्वर्गाणां निषेधस्य कथनात् आक्षेपालङ्कारः।

उदाहरणान्तरम्—

यस्यास्ति नरक क्रोड निवासे रसिकं मनः।
सोऽस्तु हिंसानृतस्तेयतत्परः सुतरां जनः ॥७७॥

यस्येति—यस्य पुरुषस्य नरकस्य क्रोडे मध्ये निवासः तस्मिन् रसिकस्य सदानुरागस्य अस्ति, सः जनः सुतराम् निरन्तरम् हिंसा नृतस्तेयतत्परः हिंसादिदुष्टापापाचरणेषु तत्परः अस्तु।

लक्षण समन्वयः—

अत्र नरकनिवासमनिच्छता पुरुषेण हिंसादिकं न कर्तव्यम् इति निषेधस्य प्रतीतिः भवति इति आक्षेपः।

उदाहरणान्तरम्—

इच्छन्ति जेण किमि कुणन्ति करणं पणं पि जे तेच्च।
ते थनजम्मस्स लग्ग दिन्ति धणं पाण समणुवि ॥७८॥

(इच्छन्ति ये न कीर्तिं कुर्वन्ति करुणां क्षणमपि ये नैव ।
ते धनयक्षाइव नरादददति धनं मरण समयेपि ॥)

इच्छन्तीति–ये पुरुषाः कीर्तिम् यशः न इच्छन्ति, ये च करुणाम् दयाम् क्षणम् अपि न कुर्वन्ति, धनयक्षाः इव धनरक्षण नियुक्तदेवयोनि विशेषाः इव ते पुरुषाः मरणसमयेपि मृत्युकालेपि धनम् ददति किम् ?

लक्षण समन्वयः—

अत्र कीर्तिकामनाशून्यैः करुणापराङ्मुखैः पुरुषैः धनं न दीयते इति निषेधस्य प्रतीतेः आक्षेपालङ्कारः ।

निश्चयालंकारलक्षणम्—

इदमेतदिदं वेति साम्याद्बुद्धिर्हि संशयः ।
हेतुभिर्निश्चयः सोपि निश्चयान्तः स्मृतोयथा ॥७९॥

इदमिति–इदम् एतत् इदम् वा इति बुद्धिः एतत्प्रकार सन्देहास्कन्दितं ज्ञानम् संशयः । सोपि संशयः हेतुभिः कारणैः निश्चयः निश्चये परिणमन् निश्चयान्तः स्मृतः कथितः ।

उदाहरणम्—

किं केशपाशः प्रतिपक्षलक्ष्म्याः
किं वा प्रतापानलधूम एषः ।
दृष्ट्वा भवत्पाणिगतं कृपाण-
मेवं कवीनां मतयः स्फुरन्ति ॥ ८० ॥

किमिति–हे नृपते ! इति अध्याहार्यम् भवतः पाणिगतम् हस्तगतम् कृपाणम् खड्गम् दृष्ट्वा कवीनाम् मतयः प्रतिभाः एवम् वक्ष्यमाणरीत्या स्फुरन्ति विलसन्ति—किम् एषः प्रतिपक्षस्य शत्रु

नृपतेः लक्ष्म्याः राज्यश्रियः केशपाशः धम्मिल्लः किं वा एष प्रतापानलस्य प्रतापाग्नेः धूमः वर्तते इति शेषः ।

लक्षण समन्वय —

अत्र खड्गे 'किमयं राज्यश्रियः धम्मिल्लः आहोस्विद् नृपप्रतापाग्नेःधूमः इति सन्देहास्कन्दिता बुद्धिः सञ्जायते इति संशयालङ्कारः

निश्चयान्त संशयमुदाहरति—

इन्द्रः स एष यदि किं न सहस्रमक्ष्णां
लक्ष्मीपतिर्यदि कथं न चतुर्भुजोऽसौ ।
आः स्यन्दन ध्वजधृतोद्धुर ताम्रचूडः
श्रीकर्णदेवनृपसूनुरयं रणाग्रे ॥ ८१ ॥

इन्द्र इति—यदि एषः पुरोवर्ती पुरुषः सः प्रसिद्धः इन्द्रः देवराजः अस्ति तर्हि अक्ष्णाम् नेत्राणाम् सहस्रम् किं न कथं न वर्तते । यदि एषः लक्ष्मीपतिः विष्णुः वर्तते तर्हि असौ चतुर्भुजः कथं न वर्तते । आः ज्ञातम् अयं रणाग्रे युद्धस्य पुरोभागे स्यन्दनध्वजे रथपताकायाम् धृतः न्यस्तः उद्धुरः उत्कटः ताम्रचूडः कुक्कुटः येन तादृश श्रीकर्णदेवनृपसूनुः जयसिंहदेवः वर्तते ।

लक्षण समन्वय.—

अत्र राजि 'इन्द्रोऽयम् विष्णुर्वा' इति संशयः सहस्रनेत्राभाव, चतुर्भुजाभाव, कुक्कुटाङ्कितरथपताकारूपैः हेतुभिः 'अयं कर्णदेवसूनुः' इत्याकारके निश्चये परिणमति इति निश्चयान्तः संशयः ।

दृष्टान्तलक्षणम्—

अन्वयख्यापनं यत्र क्रियया स्वतदन्ययोः ।
तं दृष्टान्तमिति प्राहुरलङ्कारं मनीषिणः ॥ ८१ ॥

अन्वयमिति–यत्र क्रियया क्रियाद्वारा स्वस्य प्रासङ्गिकस्य तदन्यस्य अप्रासङ्गिकस्य च वस्तुनः अन्वयस्य समानगुणतारूप-सम्बन्धस्य सादृश्यस्य वा स्थापनम् प्रत्ययः भवेत् तम् अलङ्कारम् विद्वांसः पण्डिताः दृष्टान्तम् इति प्राहुः कथयन्ति ।

उदाहरणम्—

पतितानां संसर्गं त्यजन्ति दूरेण निर्मला गुणिनः ।
इति कथयन् जरतीनां हारः परिहरति कुचयुगलम् ८३

पतितानामिति–निर्मलाः स्वच्छाः शुद्धान्तः करणाश्च गुणिनः गुणिनः गुणवन्तः पुरुषाः सूत्रयुक्ताश्च मणयः इति भावः पतितानाम् पापयुक्तानाम् अधः पतितानाम् च संसर्गम् संगतिम् दूरेण दूरत एव त्यजन्ति इति कथयन् हारः जरतीनाम् वृद्धनारीणाम् कुचयुगलम् स्तनद्वयम् परिहरति त्यजति ।

लक्षण समन्वयः—

अत्र पतितपरिहरणरूप क्रियया प्रस्तुतस्य हारस्य अप्रस्तुतैः गुणिभिः सह निर्मलत्व, गुणवत्वरूपं सादृश्यं प्रतीयते इति दृष्टान्तालङ्कारः ।

व्यतिरेकस्य लक्षणम्—

केनचिदत्र धर्मेण द्वयोः संसिद्ध साम्ययोः ।
भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ॥ ८४ ॥

केनचिदिति–यत्र संसिद्धम् साम्ये प्रसिद्धम् साम्यम् तुल्यता ययोः तथा भूतयोः द्वयोः उपमानोपमेययोः केनचित् धर्मेण गुणेन एकतरस्य उपमेयस्य उपमानस्य वा आधिक्यम् भवेत् सः व्यतिरेकः कथ्यते ।

तदुदाहरणम्-

अस्त्वस्तु पौरुषगुणाज्जयसिंह देव-
पृथ्वीपतेर्मृगपतेश्च समानभावः ।
किं त्वेकतः प्रतिभटाः समरं विहाय
सद्यो विशन्ति वनमन्यमशङ्कमानाः ॥८५॥

अस्त्विति-जयसिंहदेव पृथ्वीपतेः तदाख्यस्य नृपस्य मृगपतेः सिंहस्य च पौरुषगुणात् पराक्रमरूपगुणसाधर्म्यात् समानभावः तुल्यत्वम् अस्तु अस्तु भवतु भवतु । किन्तु एकतः एकस्मात् जयसिंहदेवात् इत्यर्थः बिभ्यतः इति शेषः प्रतिभटाः शत्रुसैनिकाः समरम् युद्धम् विहाय त्यक्त्वा अन्यम् सिंहम् अशङ्कमानाः अगणयन्तः सद्यः झटिति वनम् विशन्ति ।

लक्षणसमन्वयः—

अत्र पतित्वरूपसाधर्म्यात् सिद्धतुल्यताकयोः सिंह जयसिंहदेवयोः एकतरस्य जयसिंहदेवस्य भीतिजनकत्वरूपेण धर्मेण आधिक्यात् व्यतिरेकालङ्कारः ।

अपह्नुतिलक्षणम्—

नैतदेतदिदं ह्येत दित्यपन्हवपूर्वकम् ।
उच्यते यत्र सादृश्यादपन्हुतिरियं यथा ॥ ८६ ॥

नेति-यत्र सादृश्यात् साधर्म्यात् एतत् एतत् न, किन्तु इदम् एतत् अस्ति इति अपह्नवपूर्वकम् प्रथम प्रतिषेधपूर्वकम् उच्यते कथ्यते इयम् अपह्नुति=कथ्यते यथा—

उदाहरणम्—

नैतन्निशायां क्षित सूच्य भेद्य-

मन्धीकृता लोचनमन्धकारम् ।
निशागमप्रेषित पञ्चबाण-
सेना समुत्थापित एष रेणुः ॥ ८७ ॥

नेति—निशागम शार्वी निशा तीक्ष्णा शार्वरी तथा अपेक्षया अतिशायितया मेदुरतमस्य अन्धीकृतम् आलोकनम् दृष्टिः येन तल्लोकम् एतत् अन्धकारं न वर्तते । नहि किमेतत् इत्याह एष मतिवर्तिं यातुविशेष निशागमे रात्रि प्रारम्भ प्रेषिता युद्धार्थम् इतस्ततः या पञ्चबाणस्य कामदेवस्य सेना तया समुत्थापितः उत्थितः रेणुः रजः वर्तते इति भावः ।

लक्षण समन्वय —

अत्र अन्धकारस्य अपलापात् (अपह्नवात्) रेणोश्च स्थापनात् अपह्नुतिः ।

तुल्ययोगिता लक्षणम्—

उपमेयं समीकर्तुमुपमानेन योज्यते ।
तुल्यैक काल क्रियया यत्र सा तुल्ययोगिता ॥८८॥

उपमेयमिति—यत्र उपमेयम् उपमानेन सह समीकर्तुं तुल्या समाना वा एककाला तुल्यकालवर्ती क्रिया तया उपमेयम् उपमानेन सह योज्यते सा तुल्ययोगिता ।

तदुदाहरणम्—

तमसा लुप्यमानानां लोकेऽस्मिन् साधुवर्त्मनाम् ।
प्रकाशनाय प्रभुता भानोस्तव च दृश्यते ॥ ८९ ॥

तमसेति—हे नृपते ! अस्मिन् लोके जगति तमसा अन्धकारेण अज्ञानेन च लुप्यमानानाम् अदर्शनम् गच्छताम् साधुवर्त्मनाम्

नानाम् च साधुवर्त्मनाम् शोभनमार्गाणाम् शोभनाचाराणाम् च प्रकाशनाय प्रकटनाय संस्करणाय च भानोः सूर्यस्य तव च प्रभुता सामर्थ्यम् दृश्यते ।

लक्षण समन्वय—

अत्र साम्यप्रदर्शनाय वर्तमान कालया 'दृश्यते'-इत्येक क्रियया उपमेयस्य राज्ञः उपमानेन सूर्येण सह योगात् तुल्ययोगिता ।

उत्प्रेक्षालक्षणम्—

कल्पना काचिदौचित्याद्यत्रार्थस्य सतोऽन्यथा ।
द्योतितेवादिभिः शब्दैरुत्प्रेक्षा सा स्मृता यथा ॥९०॥

कल्पनेति—यत्र सतः वर्तमानस्य अर्थस्य वस्तुनः औचित्यात् योग्यत्वात् इवादिभिः इवप्रभृतिभिः अत्र आदि शब्देन "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः । उत्प्रेक्षा व्यञ्जकाः शब्दा इव शब्दोऽपि तादृशः ॥" इति एतत्प्रोक्ताः 'मन्ये' प्रभृतयः गृह्यन्ते । शब्दैः द्योतिता प्रकटिता काचित् अन्यथा भिन्नप्रकारा कल्पना सम्भावना भवेत् सा उत्प्रेक्षा स्मृता कथिता ।

उदाहरणम्—

नभस्तले किञ्चिदिव प्रतिष्ठा—
श्चकाशिरे चन्द्र रुचि प्ररोहा ।
जगद् गिलित्वा हसतः प्रमोदाद्
दन्ता इव ध्वान्त निशाचरस्य ॥ ९१ ॥

नभस्तले इति—नभस्तले आकाशे किञ्चित् इव अल्पमात्रमेव प्रतिष्ठाः स्थिताः चन्द्रस्य रश्मयोऽङ्कुराः किरणाङ्कुराः जगत् गिलित्वा निगीर्य प्रमोदात् हर्षातिशयात् हसतः हासं कुर्वतः ध्वान्त निशाचरस्य अन्धकाररूपस्य राक्षसस्य दन्ता इव चकाशिरे रेजिरे

लक्षण समन्वयः—

अत्र गतः अर्थस्य चन्द्रस्य दुग्धत्वेन कल्पना सा च 'इव' शब्देन योजिता इति उत्प्रेक्षालङ्कारः ।

अर्थान्तरन्यासलक्षणम्—

उक्तसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः ।
कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा ॥९२॥

उक्तेति-उक्तस्य अर्थस्य सिद्ध्यर्थम् पुष्ट्यर्थम् व्याप्तिपुरस्सरः पुष्टियुक्तः अन्यार्थन्यासः द्वितीयार्थकथनम् अर्थान्तरन्यासः कथ्यते । सः अर्थान्तरन्यासः श्लिष्टः श्लेषयुक्तः अश्लिष्टः श्लेषरहितश्च इति द्विधा ।

उदाहरणम्—

शोणत्वमक्ष्णामसिताब्जभासां
गिरां प्रचारस्त्वपरप्रकारः ।
बभूव पानान्मधुनो वधूना-
मचिन्तनीयो हि सुरानुभावः ॥ ९३ ॥

शोणत्वमिति-वधूनाम् स्त्रीणाम् मधुनः मद्यस्य पानेन असिताब्जभासाम् नीलकमलद्युतीनाम् अक्ष्णाम् नेत्राणाम् शोणत्वम् रक्तत्वम् तथा गिराम् वाचाम् प्रचारः प्रयुक्तिः अपरप्रकारः भिन्नः आसीत् । हि निश्चयेन सुरायाः मद्यस्य सुराणां देवानां च अनुभावः प्रभावः अचिन्तनीयः विचारशक्ति बाह्यः अलौकिकः इति भावः वर्तते इति शेषः ।

लक्षण समन्वयः—

अत्र मद्यपानजन्य, नेत्ररक्तत्व, स्वरभेद रूपस्य पूर्वोक्तस्य अर्थस्य परिपोषार्थम् "अचिन्तनीयो हि सुरानुभावः" इत्याख्या-

यस्य कथनात् अर्थान्तरन्यासः सुरा पदस्य मद्यदेवतारूपार्थ-द्वयस्य वाचकत्वात् श्लिष्टः

अश्लिष्टार्थान्तरन्यासोदाहरणम्—

शुण्डादण्डैः कम्पिताः कुञ्जराणां
पुष्पोत्सर्गं पादपाश्चारु चक्रुः।
स्तब्धाकाराः किं प्रयच्छन्ति किञ्चित्
कान्ता यावन्नोद्धतैर्वीतशङ्कम् ॥ ९४ ॥

शुण्डादण्डैरिति—पादपाः वृक्षाः कुञ्जराणाम् हस्तिनाम् शुण्डादण्डैः कम्पिताः सन्तः पुष्पाणाम् उत्सर्गम् दानम् इतिभावः चारु मनोहरं यथा तथा चक्रुः। स्तब्धः चेष्टाशून्यः आकारः येषाम् ते जडाः इत्यर्थः यावत् उद्धतैः धृष्टैः न कान्ताः न अभिभूताः तावत् किञ्चित् किमपि वस्तु प्रयच्छन्ति ददति किम् ? न किञ्चिदपि इति भावः।

लक्षण समन्वयः—

अत्र "वृक्षाः हस्तिभिः कम्पिताः एव पुष्पाणि ददुः" इति पूर्वोक्तार्थः अर्थद्वयवाचकपदरहितेन उत्तरार्द्धेन समर्थ्यते इति अश्लिष्टार्थान्तरन्यासः।

समासोक्तिलक्षणम्—

उच्यते वक्तुमिष्टस्य प्रतीतिजननक्षमम्।
सधर्म सा समासोक्ति रन्योक्तिर्वाभिधीयते ॥ ९५ ॥

उच्यते इति—यत्र वक्तुम् इष्टस्य अभिलषितस्य, विवक्षितस्य अन्यवस्तुनः इत्यर्थः प्रतीतिजनने प्रत्ययोत्पादने क्षमम् समर्थम् सधर्मम् तुल्यधर्मकं अन्यत् वस्तु उच्यते सा समासोक्तिः अन्योक्तिः वा उच्यते।

उदाहरणम्—

मधुकर ! मा कुरु शोकं
विचर करीरद्रुमस्य कुसुमेषु
घन तुहिन पातदग्धा
कथं नु सा मालती मिलति ॥ ९६ ॥

मधुकरेति—हे मधुकर ! भ्रमर ! शोकम् मा कुरु । करीरद्रुमस्य करीरवृक्षस्य कुसुमेषु स्वच्छं भ्रमणं कुरु । घनतुहिनस्य शिशिरहिमस्य पातेन पतनेन दग्धा नष्टा सा त्वया अनुभूता मालती कथम् केन प्रकारेण मिलति नु वितर्के ।

लक्षण समन्वय —

अत्र 'हे बालक ! नव यौवनयुक्ता कान्तिमती अनवरतं शोकं दुर्वीरस्य अन्यस्त्रीभिः स्वमनो विनोदं कुरु' इत्याद्यभिप्रायस्य विवक्षितस्य अन्यापदेशस्य वर्णनेन अप्रस्तुतादि भिन्नवस्तुनः निबन्धनात् समासोक्तिः ।

विभावनालक्षणम्

विना कारणसद्भावं यत्र कार्यस्य दर्शनम् ।
नैसर्गिक गुणोत्कर्षभावनात् सा विभावना ॥९७॥

विनेति—यत्र कारणसद्भावं विना हेतुं विनैव नैसर्गिकगुणोत्कर्षस्य स्वाभाविक गुणादिकस्य भावनात् उपपत्तेः कार्यस्य दर्शनं भवति सा विभावना उच्यते ।

उदाहरणम् —

अनध्ययन विद्वांसो निर्द्रव्य परमेश्वराः ।
अनलङ्कार सुभगाः पान्तु युष्मान् जिनेश्वराः ॥९८॥

अनध्ययनेति—नास्ति अध्ययनं येषाम् तादृशाः अनध्ययाः विद्याः इत्यर्थः अथापि विद्वांसः पण्डिताः, निर्द्रव्याः धनशून्याः अथच परमेश्वराः ऐश्वर्यवन्तः, अनलङ्काराः आभरणरहिताः तथापि सुभगाः शोभनदर्शनाः जिनेश्वराः योदशशिरोमणयः युष्मान् पान्तु रक्षन्तु ।

लक्षण समन्वयः—

अत्र स्वाभाविका लौकिकगुणशालिषु जिनेश्वरेषु पाण्डित्य-हेतोः अध्ययनस्य, ऐश्वर्यहेतोः द्रव्यविशिष्टत्वस्य, शोभनदर्शनत्व हेतोः सालङ्कारत्वस्य अभावेऽपि पाण्डित्य, ऐश्वर्य, सुभगत्वरूपाणाम् कार्याणाम् सद्भावात् विभावना ।

दीपकालङ्कारोदाहरणम्—

आदिमध्यान्त वर्त्येक पदार्थेनार्थ संगतिः ।
वाक्यस्य यत्र जायेत तदुक्तं दीपकं यथा ॥९९॥

आदीति—यत्र आदिवर्तिना मध्यवर्तिना अन्तवर्तिना एकपदार्थेन क्रियारूपेण सह वाक्यस्य संगतिः जायेत तत् दीपकम् उच्यते ।

तदुदाहरणम्—

जगुस्तव दिवि स्वामिन् गन्धर्वाः पावनं यशः ।
किन्नराश्च कुलाद्रीणां कन्दरेषु मुहुर्मुदा ॥ १०० ॥

जगुरिति—हे स्वामिन् ! गन्धर्वाः दिवि आकाशे किन्नराः देवयोनिविशेषा कुलाद्रीणां कुलपर्वतानाम् कन्दरेषु गुहासु तव पावनं यशः मुदा हर्षेण मुहुः वारम्वारम् जगुः कीर्तयामासुः ।

लक्षण समन्वयः—

अत्र पद्यादिस्थेन 'जगुः' इति क्रियारूपेण एकपदार्थेन

'रम्यतां हर यशः क्रतुः' 'विकसाम तव यशः क्रतुः' इत्येव द्वयो द्वयोः वाक्ययोः संगतिः इति दीपकम् ।

उदाहरणान्तरम्—

विराजन्ते तपिश्राणि द्योतन्ते दिवितारकाः ।
विभान्ति कुमुदश्रेण्यः शोभन्ते निशिदीपिकाः ॥१०१

विराजन्तीति—निशि रात्रौ तपिश्राणि नभांसि विराजन्ते विशोभन्ते । दिवि आकाशे तारकाः नक्षत्राणि द्योतन्ते प्रकाशन्ते । कुमुदश्रेण्यः श्वेतकमलसमूहाः विभान्ति, दीपकाः च शोभन्ते ।

लक्षण समन्वय -

अत्र पद्यपद्ये 'निशि' इत्येक पदार्थेन 'विराजन्ति तपिश्राणि' इत्यादि चतुर्वाक्ये गतार्थत्वेन चतुर्णामेव वाक्यानामर्थस्य संगतिः भवति इति दीपकम् ।

अतिशया लङ्कारलक्षणम्

वस्तुनोवक्तुमुत्कर्षम् असंभाव्यं यदुच्यते ।
वदन्त्यतिशयाख्यं तमलङ्कारं बुधायथा ॥ १०२ ॥

वस्तुन इति—वस्तुनः अर्थस्य उत्कर्ष प्रकृष्टताम् वक्तुम् यत् असम्भाव्यम् सम्भावना शून्यम् उच्यते, बुधाः तम् अतिशयाख्यम् अतिशयनामकम् अलङ्कारम् वदन्ति । यथः—

उदाहरणान्तरम्—

त्वच्छारितारितरुणीश्वासितानिलेन
संमूर्छितोर्मिषु महोदधिषु क्षितीश ! ।
अन्तर्लुठद्गिरि परस्पर शृङ्गसंग-
घोरारवैर्मुररिपोरपयाति निद्रा ॥ १०४ ॥

त्वदिति—हे क्षितीश ! पृथिवीपते ! त्वया दारितानाम् युद्धे हतानाम् अरीणाम् याः तरुण्यः स्त्रियः तासाम् श्वसितानिलेन श्वासवायुना संमूर्छिताः प्रवृद्धाः ऊर्मयः तरङ्गाः येषाम् तेषु महोदधिषु महासमुद्रेषु अन्तः जलाभ्यन्तरे लुठन्तः इतस्ततः सञ्चलन्तः ये गिरयः पर्वताः तेषाम् यः परस्परम् अन्योन्यम् शृङ्गसङ्घः शिखरसङ्घट्टनम् तस्य ये घोरारवाः भयङ्करध्वनयः तैः मुररिपोः विष्णोः निद्रा अत्यन्त दूरीभवति ॥

लक्षण समन्वयः—

अत्र राजप्रताप रूपस्य वस्तुनः उत्कर्षं प्रतिपादयितुं "त्वन्नाशित शत्रुस्त्रीणां निःश्वासैः समुद्रकल्लोलाः उच्छलन्ति, गिरीणां च मिथः शृङ्गसङ्घट्टनं भवति, शृङ्गसङ्घट्टनोत्पादित भीषण शब्दैश्च समुद्रे शयानस्य विष्णोः निद्राभङ्गो भवति" इत्याकारकस्य नितराम सम्भाविनोऽर्थस्य वर्णनात् अतिशयालङ्कारः ।

'यदि' शब्दयोगे अतिशयमुदाहरति—

एक दण्डानि सप्तस्युर्यदिच्छत्राणि पर्वते ।
तदोपमीयते पार्श्वे मूर्ध्नि सप्तफणः फणी ॥ १०४ ॥

एकेति—यदि पर्वते एकदण्डानि एकदण्डयुक्तानि सप्तछत्राणि स्युः भवेयुः तदा पार्श्वे मूर्ध्नि पार्श्वनाथशिरसि सप्तफणाः यस्य तादृशः फणी सर्पः उपमीयेत सोपमानः स्यात् ।

लक्षण समन्वयः—

अत्र पार्श्वनाथशिरस्थ सर्प रूपस्य वस्तुनः उत्कर्षसूचनाय एकदण्ड विशिष्ट सप्तच्छत्रयुत पर्वतरूपस्य असम्भाव्य वस्तुनः वर्णनात् अतिशयालङ्कारः ।

हेत्वलङ्कारलक्षणम्—

यत्रोत्पादयतः किञ्चिदर्थं कर्तुः प्रकाश्यते ।
तद्योग्यता युक्तिः सो हेतुरुक्तो बुधैर्यथा ॥ १०५ ॥

यत्रेति—यत्र किञ्चिदर्थम् किमपि वस्तु उत्पादयतः सम्पाद-यतः कर्तुः तस्य अर्थस्य च उत्पादनायाः साधनशक्तेः युक्तिः कारणम् प्रकाश्यते अयं पुनः पण्डितैः हेतुः उक्तः । अस्मात् कारणात् अयं पुरुषः एतत् कार्यम् कर्तुं शक्नोतीति यत्र उच्यते स हेतु नामालङ्कारः । यथा—

उदाहरणम्-

जोव्वणसम उम्मत्तो तत्ता विरहेण कुणइ णाहस्स ।
कण्ठब्भन्तरघोलिर महुरस्सरं बालिआ गीअम् ॥१०६॥
यौवन समयोन्मत्ता तप्ता विरहेण करोति नाथस्य ।
कण्ठाभ्यन्तरघोलितमधुरस्वरं बालिका गीतम् ॥)

यौवनेति—यौवन समयेन यौवनोद्गमेन उन्मत्ता नाथस्य विरहेण वियोगेन तप्ता दुःखिता बालिका नूतना वधूः कण्ठा-न्तरे एव घोलितः प्रकाशितः लज्जया बहिः न प्रकाशितः इति भावः मधुरः मनोहरः स्वरः यत्र तत् यथा भवति तथा गीतं करोति ॥

लक्षणसमन्वयः—

अत्र गीतरूपमधुरोत्पादनाय बालिकाया यौवनजन्योन्म-त्ताहेतुकस्य प्रिय वियोग व्यथ रूपस्य च गीतोत्पादने योग्यता-कारणस्य प्रकाशनात् हेत्वलङ्कारः ।

उदाहरणान्तरम्-

रससोअरेमिअङ्कोक अन्तआसाइ आगओ पवणो ।

जाइपलासोसिहरीपहिएमारन्ति ते दाक्षिणम् ॥७॥
(विससोदरो मृगाङ्कः कृतान्त दिशात आगतः पवनः।
जातपलाशः शिखरी पथिकान् मारयन्त्येत इदानीम् ॥)

विषेति—विषस्य सोदरः एकमातृकः भ्राता द्वयोरपि एक समुद्रसंभूतत्वात् इत्याशयः मृगाङ्कः चन्द्रः, कृतान्तस्य यमस्य दिशातः दक्षिणदिशः आगतः पवनः वायुः जातानि उत्पन्नानि पलाशानि पत्राणि यस्य तादृशः शिखरी वृक्षः च एते त्रयः इदानीम् वसन्तसमये पथिकान् मारयन्ति।

लक्षण समन्वयः—

विषं हि प्राणहरं वस्तु, अतः तद्भ्रातुः चन्द्रस्य अपि प्राणहरत्वम्, कृतान्तस्य घातकत्वम् जगति प्रसिद्धमेवेति तद्दिशातः समागतस्य वायोरपि तथात्वम् युक्तियुक्तमेव, एवं 'जातपलाशः' इति विशेषणस्य 'जाता पलस्य मांसस्य आशा यस्य' इति अर्थकरणेन शिखरिणोऽपि मारकत्वम् सुचितमेवेति विषसोदरादीनि त्रीणि विशेषणानि क्रमेण मृगाङ्क पवन शिखरिणां मारकत्वे साभिप्रायत्वं प्रकाशयन्तीति परिकराङ्कुरः।

पर्यायोक्ति लक्षणम्—

अतत्परतया यत्र जल्प्यमानेन वस्तुना ।
विवक्षितं प्रतीयेत पर्यायोक्तिरियं यथा ॥ १०८ ॥

अतत्परतयेति—यत्र अतत्परतया तदर्थानभिधायकतया जल्प्यमानेन कथ्यमानेन वस्तुना विवक्षितं वक्तुमिष्टम् वस्तु प्रतीयेत सूच्येत इयम् पर्यायोक्तिः। यथा—

उदाहरणम्—

त्वमिन्धवाह निवहस्य महाहवेषु

द्वेषः प्रभो ! रिपुपुरन्धिजनस्य चासीत् ।
एकः खुरै बहुलरेणुततिं चकार
तां संजहारः पुनरश्रुजलैर्यदन्यः ॥ १०९ ॥

शिशिरि-हे प्रभो ! महाहवेषु घोरयुद्धेषु तव सैन्यस्य तव सेनायाः ये वाहाः घोटकाः तेषाम् निकरस्य समूहस्य रिपुपुरन्धिजनस्य शत्रुस्त्रीजनस्य च द्वेषः शत्रुभावः आसीत् । यत् यस्मात् कारणात् एकः घोटकसमूहः खुरैः बहुलाम् अनल्पाम् रेणुततिम् धूलिविस्तरम् चकार । अन्यः शत्रुस्त्रीजनः पुनः ताम् रेणु सन्ततिम् अश्रुजलैः पतिमरणजन्यशोकाश्रुभिरित्यर्थः संजहार दूरी चकार ।

लक्षण समन्वयः—

अत्र "राजसेनाश्वखुरोद्धूतं रजः मृतशत्रुस्त्रीशोकाश्रुजलैः निराकृतम्" इत्यादिवक्तव्येन वस्तुना विवक्षितार्थम् कथयता 'राजा वरेः शत्रवः' इत्याकारकं वस्त्वभिष्टं वस्तु प्रतीयते इति पर्यायोक्तिः

समाहित लक्षणम्—

कारणान्तर संपत्ति दैवादारम्भ एवं हि ।
यत्र कार्यस्य जायेत तज्जायेत समाहितम् ॥११०॥

कारणेति-यत्र कार्यस्य आरम्भे एव दैवात् कारणान्तरस्य अन्य कारणस्य सम्पत्तिः समुपस्थितिः जायेत तत् समाहितम् जायेत

तदुदाहरणम्—

मनस्विनी वल्लभवेश्म गन्तुम्
उत्कण्ठिता यावदभूत् निशायाम् ।
तावत् नवाम्भोधरधीरनाद-
प्रबोधितः सोऽपशिखीनिकुञ्ज ॥ १११ ॥

मनस्विनीति—मनस्विनी मानवती स्त्री निशायां रात्रौ या(वत्) वल्लभस्य कान्तस्य वेश्म सदनम् गन्तुम् उत्कण्ठिता उत्सु(का) अभूत्, तावत् नवाम्भोधरस्य नवीनमेघस्य धीरनादेन गम्भीर(गर्जनेन) विना प्रबोधित नाशितनिद्रः मौषधिशाली सवनशिखः मयू(रः) मुहुः कूजितं चकार।

लक्षण समन्वयः—

अत्र वल्लभवेश्मगमनस्य उत्कण्ठारूपे एकस्मिन् कारणे सत्य(पि) कान्तगृहगमनारम्भ एव अकस्मात् मयूर कूजित रूपस्य कारणा(न्त)रस्य समुपपत्तेः समाधिरलङ्कारः।

परिवृत्तिलक्षणम्—

परिवर्तनमर्थेन सदृशासदृशेन वा
जायेतार्थस्य यत्रासौ परिवृत्तिर्यथा मता ॥ ११२ ॥

परिवर्तनमिति-यत्र [illegible] सदृशेन असदृशेन अनुरूपेन [illegible] अर्थेन सह अर्थस्य परिवर्तनम् जायेत असौ परिवृत्तिः मता कवि(भिः) यथा—

उदाहरणम्-

अन्तर्गतं स्फाटिकहर्म्यभित्तौ
प्रभाभिरुद्दीपित नृपु मर्तः।
स्फाटिकदीपानि गृहाणि पुत्रा
गृहासु शेते त्वदरीणि वर्गः ॥

अन्तर्गतेति [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible] ।

लक्षण समन्वयः—

अत्र फणामणयः प्रदीपाः सदृशाः, प्रदीपत्र प्रकाशितानां गुहा-णां फणामणि प्रकाशिताभिः गुहाभिः सह परिवर्तनेन परिवृत्ति-रलङ्कारः ।

असदृशेनार्थेनार्थस्य परिवृत्तिमुदाहरति—

दत्वा प्रहारं रिपुपार्थिवानां
जग्राह यः संयति जीवितव्यम् ।
शृंगारभंगींच तदंगनाना-
मादाय दुःखानि ददौ सदैव ॥ ११४ ॥

दत्वेति—य नृपः संयति युद्धे प्रहारं दत्वा रिपुपार्थिवानाम् शत्रुनृपाणाम् जीवितव्यम् प्राणान् जहार हतवान् तदङ्गनानाम् तत्स्त्रीणाम् शृङ्गारभङ्गीं शृङ्गाररचनां च आदाय गृहीत्वा दुःखानि ददौ ।

लक्षण समन्वयः—

अत्र प्रहारस्य असदृशेन जीवितेन सह दुःखस्य च असदृशा शृङ्गारभङ्ग्या सह परिवर्तनात् परिवृत्तिरलङ्कारः ।

यथासंख्यं लक्षयति—

यथोक्तानां पदार्थानामर्थाः सम्बन्धिनः पुनः ।
क्रमेण तेन बध्यन्ते तद्यथा संख्यमुच्यते ॥ ११५ ॥

यथेति—यथ उक्तानाम् प्रतिपादितानाम् पदार्थानाम् सम्ब-न्धिनः अर्थाः पुनः तेन क्रमेण बध्यन्ते रच्यन्ते तत् यथा संख्यम् उच्यते ।

उदाहरणम्—

मृदु भुजलतिकाभ्यां श्रोणिमाने दधत्या

चरणकमलभासा चारुणा चाननेन ।
विसकिसलय पद्मान्यात्त लक्ष्मीणिमन्ये
विरहविपदि वैरात्तन्वते तापभंगे ॥ ११६ ॥

मृदिति–मृदु भुजलतिकाभ्याम् कोमलबाहुवल्लीभ्याम्, शो-णिमालय रक्तताय दृष्टया विभ्रमया चरणकमलयोः पादपद्मयोः भासा कान्त्या, चारुणा मनोहरेण आननेन मुखेन च आत्ता गृहीता लक्ष्मीः येषां तानि विसकिसलय पद्मानि मृणाल–कोमलपत्र–कमलानि विरहः पतिवियोगः एव विपद् विपत्तिः तस्यां तत्पाप वैरोद्भावात् अङ्गे शरीरे तापम् सन्तापम् तन्वते प्रसारयन्ति ।

लक्षणसमन्वयः—

अत्र भुजलता, चरणकमल, आननशब्दानां सम्बन्धिनः बिस–किसलय–पद्मशब्दाः पदार्थाः क्रमेण निबद्धाः इति यथासंख्यम् अलङ्कारः ।

विषमालङ्कारलक्षणम्—

वस्तुनो यत्र सम्बन्धघटनौ विनेन केनचित् ।
असम्भाव्यं वदेद्वक्ता तदाहुर्विषमं यथा ॥ ११७ ॥

वस्तुन इति–यत्र वक्ता [illegible] पदार्थेन केनापि अन्येन वस्तुना सह सम्बन्ध [illegible] योगमात्र [illegible]लेन अस [illegible] सम्भावनीयमिति व [illegible] म ।

[illegible]

[illegible] तवरपुर्वमे ! [illegible] ।
[illegible] गर्नीमति ! [illegible] ॥ ६
[illegible]
[illegible]

त्यादि प्रतिपादितस्य नियम विशेषस्य परिग्रह ग्रहणम् च क ? त्वत्सदृशकोमलाङ्ग्या बालाया पुत्र्याः क्लिष्टग्रहणं न युज्यते इतिभावः

लक्षण समन्वयः—

अत्र कदलीगर्भकोमलशरीररूपस्य वस्तुनः कठोरधनुःपरिपालनरूपेण अन्येन वस्तुना सह सम्बन्धस्य न सम्भवः इति वर्णनात् विषमालङ्कारः ।

सहोक्तिलक्षणम्—

सहोक्तिः सा भवेद्यत्र कार्यकारणयोः सह ।
समुत्पत्ति कथा हेतोर्वक्तुं तज्जन्मशक्तताम् ॥ ११९ ॥

सहोक्तिरिति—यत्र हेतोः कारणस्य तस्य कार्यस्य जन्मनि उत्पादने इत्यर्थः शक्ततां सामर्थ्यं वक्तुं कार्यकारणयोः सह युगपत् समुत्पत्तेः जन्मनः कथा कथनम् भवेत् सा सहोक्तिः उच्यते ।

उदाहरणम्—

आदत्ते सहयशसा नमयति सार्धं मदेन संग्रामे ।
सह विद्विषां श्रियासौ कोदण्डं कर्षति श्रीमान्॥१२०॥

आदत्त इति—श्रीमान् शोभासम्पन्नः लक्ष्मीयुक्तो वा असौ नृपः विद्विषाम् शत्रूणाम् यशसा कीर्त्या सह संग्रामे कोदण्डं धनुः आदत्ते गृह्णाति, मदेन अभिमानेन सार्धम् नमयति, श्रिया लक्ष्म्या सह कर्षति ।

लक्षण समन्वय —

कारणस्य नियमेन कार्यात्पूर्वमुत्पत्ति रितिलोके शास्त्रे च प्रसिद्धम्; अत्र तु कार्यजननसामर्थ्यातिशयं बोधयितुं कारणस्य धनुः कर्षणस्य तत्कार्यभूतैः कीर्तिहरण, मदनाशन, श्रीहरणैः सहैव कथनात् सहोक्त्यलङ्कारः ।

विरोधलक्षणम्

आपाते हि विरुद्धत्वं यत्र वाक्ये न तत्वतः ।
शब्दार्थकृतमाभाति स विरोधः स्मृतो यथा ॥१२१॥

आपात इति—यत्र यस्मिन् वाक्ये आपाते शब्दश्रवणक्षण-मात्र एव शब्दार्थाभ्याम् कृतम् जनितम् विरुद्धत्वम् विरोधः भा-भाति, परम् तत्वतः याथ तथ्येन न आभाति वाक्यार्थ पर्यालो-चनायाम् इति भावः सः विरोधः स्मृतः कथितः । यथा—

उदाहरणम्—

दुर्वारबाणविभवेन सुवर्मणापि
लोकोत्तरत्वगभुजापि न धीवरेण ।
प्रत्यर्थिषु प्रतिरणं स्खलितेषु तेन
संग्रामयाग युयुधे पुनरेव जिष्णुः ॥ १२२ ॥

दुर्वारेति—जिष्णुः जयनशील: कोऽपि वीरपुरुषः प्रतिरणम् प्रतियुद्धम् प्रत्यर्थिषु शत्रुषु स्खलितेषु निवृत्तेषु सत्सु, संग्राम येन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]

[illegible]

पत्र बाधकः; एवं पात्र यः स्तोकोत्तरान्वयभूः (अल्प कुलोत्पन्नः) स कथं पीवरः इति आपाततः 'पीवरशब्दे' 'स्तोकोत्तरान्वयभूः' शब्दश्रवणे विरुद्धत्वमाभाति, वक्षोजयोर्विशेषणानुसारं अर्थालोचने तु न विरोधः इति शब्दकृतः विरोधालङ्कारः।

अथेदानीं विरोधमुदाहरति—

येनाक्रान्तं सिंहासनमरिभूभृच्छिरांसि विनतानि।
शिप्ता युधि शरपङ्क्तिः कीर्तिर्याता दिगन्तेषु ॥१२३॥

येनेति—येन राज्ञा सिंहासनम् आक्रान्तम् अधिष्ठितम्, अरिशिरांसि शत्रुशिरांसि विनतानि नम्रीकृतानि तेषां पराजयकरणेन इति भावः। युधि संग्रामे शरपङ्क्तिः बाणपरम्परा क्षिप्ता, कीर्तिः तत्कृतशत्रुसंहारजन्यम् यशः दिगन्तेषु याता।

लक्षण समन्वयः—

यत् आक्रान्तं भवति तदेव विनतं भवति; अत्र तु आक्रान्तं सिंहासनम् विनतानि तदनभिभूतानि शत्रुशिरांसि इति आपाततः विरुद्धत्वम् आभाति। एवं यत् क्षिप्तम् तदेव याति; अत्र तु क्षिप्ता शरपङ्क्तिः याता तु नाक्षिप्ता कीर्तिः इति आपाततः विरुद्धत्वं प्रतिभाति, वस्तुविचारपर्यालोचने तु न विरोधलेशः इति अर्थकृतः विरोधः।

अवसरलक्षणम्—

यत्रार्थान्तरमुत्कृष्टं संभवत्युपलक्षणम्।
प्रस्तुतार्थस्य स प्रोक्तो बुधैरवसरो यथा ॥१२४॥

यत्रेति—यत्र प्रस्तुतस्य प्राकरणिकस्य अर्थस्य वस्तुनः उत्कृष्टम् असाधारणम् अर्थान्तरम् अन्यत् वस्तु उपलक्षणम् संक्षेपेण बोधकं भवति सः अवसरः नामालङ्कारः बुधैः पण्डितैः प्रोक्तः।

यथा—

उदाहरणम्—

स एष निश्चयानन्दः स्वच्छन्दतमविक्रमः ।
येन नक्तंचरः सोऽपि युद्धे बर्बरकोऽजितः ॥ १२५

स इति—निश्चयेन जयप्राप्तिरिति भावः आनन्दः यस्य
दृशः सः एषः नृपतिः स्वच्छन्दतमः अतिशयेन स्वतन्त्रः वि
पराक्रमः यस्य तादृशः अस्ति इति शेषः येन युद्धे सः प्र
दुर्जयतायां प्रसिद्धोऽपि बर्बरकः तन्नामा नक्तंचरः राक्षसः जि

लक्षण समन्वयः—

अत्र महाशक्तिशालिबर्बरकपराजयरूपम् उत्कृष्टम् अर्थान्तर
राजालौकिकपराक्रमवर्णनारूपस्य प्रस्तुतार्थस्य संक्षेपतः सूचकं
(उपलक्षणम्) भवतीति अर्थान्तरालङ्कारः ।

सारलक्षणम्—

यत्र निर्धारितात् सारात् सारं सारं ततस्ततः ।
निर्धार्यते यथाशक्ति तत्सारमिति कथ्यते ॥१२६॥

यत्रेति—यत्र यतः तस्मात् निर्धारितात् निश्चितात् सारात्
उत्कृष्टात् पदार्थात् परं वस्तु सारम् उत्कृष्टतरम् अस्ति, एवम्
ततः ततोऽपि परं सारमस्ति इति यथाशक्ति स्वमतिमात्रानुसारम्
निर्धार्यते निर्णीयते तत् सारम् इति कथ्यते ।

उदाहरणम्—

संसारे मानुष्यं सारं मानुष्ये च कौलीन्यम् ।
कौलीन्ये धर्मित्वं धर्मित्वे चापि सदयत्वम् ॥ १२७॥

संसार इति—संसारे जगति मानुष्यम् मनुष्यता सारम् उत्कृष्टं
वस्तु अस्ति, मानुष्ये मनुष्यतायां कौलीन्यम् कुलीनता, कौ-
लीन्ये धर्मित्वम् धर्माचरणशीलता, धर्मित्वे च सदयत्वम् दया-
लुता सारम् अस्ति ।

लक्षण समन्वय —

अत्र पूर्वं निर्धारितात् मानुष्यादिरूपम् गाढात् उपरोक्तम् चौर्येण्वादैः साम्या निर्धार्यते इति मालाल्कारः ।

श्लेषालङ्कारलक्षणम् —

पदैस्तैरेव भिन्नैर्वा वाक्यं वदत्येकमेव हि ।
अनेकमर्थं यत्रासौ श्लेष इत्युच्यते यथा ॥ १२८ ॥

पदैरिति—यत्र एकं वाक्यम् तैः एव भिन्नैः वा पदैः अनेकम् अर्थम् वक्ति कथयति असौ श्लेषः इति कथ्यते । यथा —

उदाहरणम्—

आनन्दमुल्लासयतः समन्तात्
कैरसन्तापकरैः प्रजानाम् ।
यस्योदये क्षोभमवाप्य राज्ञो
जग्राह वेलां किल सिन्धुनाथः ॥ १२९ ॥

आनन्देति—सिन्धुनाथः सिन्धुदेशाधिपः असन्तापकरैः अदुःखजनकैः करैः बलिभिः (राजग्राह्यभागैः) समन्तात् परितः प्रजानाम् आनन्दम् उल्लासयतः वर्धयतः यस्य राज्ञः नृपस्य उदये ऐश्वर्ये क्षोभम् ग्लानिं पराभवं वा अवाप्य प्राप्य वेलाम् समयम् जग्राह यथा कथमपि अनिवार्यतया किल इति प्रथमोऽर्थः ।

द्वितीयोऽर्थः—

सिन्धुनाथः नदीश्वरः समुद्रः इत्यर्थः असन्तापकरैः शान्तिजनकैः करैः किरणैः प्रजानाम् कुमुदचकोरप्रभृतीनां लोकानां वा आनन्दम् उल्लासयतः कृतिनः यस्य राज्ञः द्विजराजस्य चन्द्रस्येत्यर्थः 'सोमः' 'इन्दुः' 'शशधरः' इत्यादिवत् 'द्विज-

राज्ञः' इत्यत्र पूर्वपदस्य लोपः लुप्ते च पूर्वपदे समासाभावात् न 'राजाहःसखिभ्यष्टच्' इति 'टच्' प्रत्ययप्रयुक्तपदसन्नि उदये आविर्भावे सोमस्य [illegible] अग्रस्य वेलाम् सीमानम् जग्राह समालिङ्गितवान् ।

लक्षण समन्वयः—

अत्र एकमेव वाक्यं नैरेव पदैः अभिन्नमर्थद्वयं वक्ति इति श्लेषालङ्कारः ।

उदाहरणान्तरम्—

कुर्वन् कुवलयोल्लासं रम्याम्भोजश्रियं हरन् ।
रेजे राजापि तच्चित्रं निशान्ते कान्तिमत्तया ॥१३०

कुर्वन्निति—राजा अपि कश्चित् नृपः अपि चन्द्रोऽपि वा कुः पृथ्वी तस्याः वलयस्य मण्डलस्य उल्लासम् अभ्युदयम् कुवलयानाम् कुमुदानाम् च उल्लासम् विकासम् कुर्वन् रम्याम् रमणीयाम् भोजस्य राज्ञः श्रियम् लक्ष्मीम् रम्याम्भोजानाम् मनोहरकमलानाम् श्रियम् शोभाम् च हरन् कान्तिमत्तया प्रतापवत्त्वेन द्युतिविशिष्टतया च निशान्ते गृहे रात्र्यन्ते च रेजे शुशुभे ।

लक्षण समन्वयः—

अत्र राजपक्षे कुवलयोल्लासमिति 'कु वलयः उल्लासः' इति त्रीणि पदानि, चन्द्रपक्षे तु कुवलानि उल्लासः इति द्वे पदे । 'रम्याम्भोजश्रियम्' इति रम्या-भोजः-श्रीः इति त्रीणि पदानि राजपक्षे, रम्या अम्भोजानि श्रीः इति त्रीणि पदानि चन्द्रपक्षे । 'निशान्ते' इति 'निशान्त' गृहवाचकम् एकपदम्, चन्द्रपक्षे तु निशा, अन्तः इति पदद्वयम् इत्यत्र भिन्नैरेव पदैः अर्थद्वयबोधो भवति इति अभङ्गपदगः श्लेषः ।

समुच्चयालङ्कारलक्षणम्—

एकत्र यत्र वस्तूना मनेकेषां निबन्धनम् ।
अत्युत्कृष्टातिकृष्टानां तं वदन्ति समुच्चयम् ॥१३१॥

एकत्रेति—यत्र अनेकेषाम् अत्युत्कृष्टानाम् अत्युत्तमानाम् अत्यपकृष्टानाम् अतिनिकृष्टानाम् च वस्तूनाम् एकत्र निबन्धनम् रचना भवति तम् समुच्चयम् वदन्ति पण्डिताः इति शेषः ।

उत्कृष्टानां समुच्चय मुदाहरति—

अणहिल्लपाटकं पुर मवनिपतिः कर्णदेवनृपसूनुः ।
श्रीकलशनामधेयः करीच रत्नानि जगतीह ॥१३२॥

अणहिल्लपाटकमिति—अणहिल्लपाटकम् नाम पुरम् नगरम्, कर्णदेवनृपसूनुः कर्णदेवनृपपुत्रः अवनिपतिः राजा, श्रीकलशनामधेयः नामधेयः करी हस्ती च इमे त्रयः इह जगति रत्नानि सन्ति ।

लक्षण समन्वयः—

अत्र उत्कृष्टानामेव वस्तूनां निबन्धनमिति उत्कृष्टवस्तुनिबन्धनः समुच्चयालङ्कारः ।

अत्यपकृष्टसमुच्चयोदाहरणम्—

ग्रामे वासो नायको निर्विवेकः
कौटिल्याना मेकपात्रं कलत्रम् ।
नित्यं रोगः पारवश्यं च पुंसा-
मेतत्सर्गं जीवतामेव मृत्युः ॥ १३३ ॥

ग्राम इति—ग्रामे वासः स्थानम्, निर्विवेकः विवेकवर्जितः नायकः स्वामी, कलत्रं स्त्री कौटिल्यानाम् कपटस्य एकम् पात्रम् बहुलतया अनुपपद पात्रम्, नित्यं रोगः, पारवश्यम् परतन्त्रता, एतत् सर्वम् जीवतामेव पुंसां मृत्युः अस्ति मरणतुल्यमस्ति ।

लक्षण समन्वयः—

अत्र सर्वेषामेव वस्तूनां निकृष्टतया निकृष्टमुपमालङ्कारः ।

अप्रस्तुतप्रशंसा लक्षणम्—

प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुनः ।
अप्रस्तुत प्रशंसां तामाहुः कृतधियो यथा ॥ १३४ ॥

प्रशंसेति–यत्र अप्रस्तुतस्यापि अप्रासङ्गिकस्यापि वस्तुनः प्रशंसा क्रियते ताम् कृतधियः विद्वांसः अप्रस्तुतप्रशंसाम् आहुः । यथा—

उदाहरणम्—

स्वैरं विहरति स्वैरं शेते स्वैरं च जल्पति ।
भिक्षुरेकः सुखी लोके राजचौरभयोज्झितः ॥ १३५ ॥

स्वैरमिति–राजचौराणां भयेन वर्जितः रहितः भिक्षुः एकः केवलः लोके सुखी भवेत्, यः स्वैरं स्वच्छन्दं विहरति भ्रमति, स्वैरं शेते, स्वैरं च जल्पति भाषते ।

लक्षण समन्वयः

अत्र 'नानाप्रकारचिन्ताः आकुलिताः धनिनः दुःखिनः सन्ति' इति वस्तुनि वर्णनीये सति 'भिक्षुरेव सुखी भवेत्' इति अप्रस्तुतं वस्तु वर्णितम् इति अप्रस्तुतप्रशंसा ।

एकावलीलक्षणम् –

पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानामुत्तरोत्तरम् ।
अर्थानां या विरचना प्रोक्तैकावलिमता ॥ १३६ ॥

पूर्वेति–पूर्वपूर्वार्थानां वैशिष्ट्येन [illegible] निष्ठानां उत्तरोत्तरम् [illegible] अर्थानां या विरचना सा [illegible] ।

उदाहरणम्—

देशः समृद्धनगरो नगराणि च सप्तभूमि निलयानि ।
निलयाः सलीलललना ललनाश्चात्यन्तकमनीया॥१३७

देश इति—देशः समृद्धानि सम्पत्तियुक्तानि नगराणि यत्र तादृशः । नगराणि च सप्तभूमिभिः सप्तखण्डैः उपलक्षिताः निलयाः गृहाणि यत्र तथा विधानि । निलयाः सलीलाः सविलासाः ललनाः रमण्यो यत्र तथोक्ताः । ललनाः च अत्यन्तकमनीयाः अतिरमणीयाः ।

लक्षण समन्वय—

अत्र पूर्वोक्तानां देश-नगर-निलय-ललनारूपाणामर्थानां मुक्तपं सूचयती समृद्धनगर-सप्तभूमिनिलय-सलीलललन-अत्यन्तकमनीयशब्दानां गुणरोपस्थापनात् एकावली ।

अनुमानालङ्कारम्—


प्रत्यक्षाल्लिंगतो यत्र कालत्रितयवर्तिनः ।
लिंगिनो भवति ज्ञानमनुमानं तदुच्यते ॥ १३८ ॥

प्रत्यक्षेति—यत्र प्रत्यक्षात् दृश्यमानात् लिङ्गतः साधनात् कालत्रितयवर्तिनः भूतभविष्यद्वर्तमानकालसम्बन्धिनः लिङ्गिनः साध्यस्य ज्ञानम् भवति तत् अनुमानम् उच्यते ।

उदाहरणम्—

नूनं नद्यस्तदाभूवन्नभिषेकाम्भसा प्रभोः ।
अन्यथा कथमेतासु जनः स्नानेन शुध्यति ॥१३९॥

नूनमिति—नूनम् निःसंशयम् तदा तस्मिन् काले नद्यः श्रीकृष्णचन्द्रस्य अभिषेकाम्भसा अभिषेकजलेन अभूवन् तथा । अन्यथा एवं न चेत् तदा जनः एतासु नदीषु कथम् शुध्यति पूतो भवति ।



[illegible] —

अत्र [illegible] वस्तुनो निन्दया [illegible] ।

अप्रस्तुतप्रशंसालक्षणम्—

प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुनः ।
अप्रस्तुतप्रशंसां तामाहुः कृतधियो यथा ॥ १३४ ॥

प्रशंसेति—यत्र अप्रस्तुतस्यापि अप्रासङ्गिकस्यापि वस्तुनः प्रशंसा क्रियते तां कृतधियः विद्वांसः अप्रस्तुतप्रशंसां आहुः । यथा—

उदाहरणम्—

स्वैरं विहरति स्वैरं शेते स्वैरं च जल्पति ।
भिक्षुरेकः सुखी लोके राजचौरभयोज्झितः ॥१३५॥

स्वैरमिति—राजचौराभ्यां भयेन वर्जितः भिक्षुः एकः केवलः लोके सुखी भवति, यः स्वैरम् स्वेच्छया विहरति स्वैरं शेते, स्वैरं च जल्पति भाषते ।

अलङ्कारसमन्वयः—

अत्र 'नानाविषयलीनाः पराधीनाः सेवाकारिणः दुःखिनः' इति वस्तुनि अर्थे वर्णयितव्ये सति 'भिक्षुरेव सुखी वर्तते' इति वस्तु वर्णितम् इति अप्रस्तुतप्रशंसा ।

एकावलीलक्षणम्—

वैशिष्ट्यनिष्ठानामुत्तरोत्तरम् ।
या विरचना बुधैरेकावली मता ॥ १३६ ॥

[illegible] वैशिष्ट्यस्य उत्कर्षस्य निष्ठा स्थितिः पूर्वपूर्वार्थोत्कर्षयुक्तानाम् अर्थानाम् उत्तरोत्तरम् या विन्यासः सा बुधैः एकावली मता कथिता ।

उदाहरणम्–

देशः समृद्धनगरो नगराणि च समभूमि निलयानि ।
निलयाः सलीलललना ललनाश्चात्यन्तकमनीयाः ॥१३७

देश इति–देशः समृद्धानि सम्पत्तियुतानि नगराणि यत्र तादृशः । नगराणि च समभूमिभिः समतलैः उपलक्षिताः निलयाः गृहाणि यत्र तथा विधानि । निलयाः सलीलाः सविलासाः ललनाः रमण्यो यत्र तथोक्ताः । ललनाः च अत्यन्तकमनीयाः अतिरमणीयाः ।

लक्षण समन्वय—

अत्र पूर्वोक्तानां देश–नगर–निलय–ललनाख्यानामर्थानां उत्कर्षं सूचयतां समृद्धनगर–समभूमिनिलय–सलीलललन–अत्यन्तकमनीयशब्दानां मुक्तकविन्यासात् एकावली ।

अनुमानलक्षणम्–

प्रत्यक्षाल्लिंगतो यत्र कालत्रितयवर्तिनः ।
लिंगिनो भवति ज्ञानमनुमानं तदुच्यते ॥ १३८ ॥

प्रत्यक्षेति–यत्र प्रत्यक्षात् दृश्यमानात् लिङ्गतः साधनात् कालत्रितयवर्तिनः भूतभविष्यद्वर्तमानकालत्रयवर्तिनः लिङ्गिनः साध्यस्य ज्ञानम् भवति तत् अनुमानम् उच्यते ।

उदाहरणम्–

नूनं नद्यस्तदाभूवन्नभिषेकाम्भसा प्रभोः ।
अन्यथा कथमेतासु जनः स्नानेन शुध्यति ॥१३९॥

नूनमिति–नूनम् निःसंशयम् तदा तस्मिन् काले नद्यः प्रभोः श्रीकृष्णचन्द्रस्य अभिषेकाम्भसा अभिषेकजलेन अभूवन् समुत्पन्नाः । अन्यथा एवं न चेत् तदा जनः एतासु नदीषु स्नानेन कथम् शुध्यति पूतो भवति ।

लक्षण समन्वयः—

अत्र प्रत्यक्षात् वृद्धिरूपात् लिङ्गात् साधनात् 'नद्यः समीरभिषेकजलैन जाताः' इत्येतस्य भूतकालसम्बन्धिनः लिङ्गिनः (साध्यस्य) ज्ञानं भवतीति अनुमानम् ।

भविष्यानुमानमुदाहरति—

जम्भभित् ककुभिज्योतिर्यथा शुभ्रं विजृम्भते ।
उदेष्यति तथामन्ये खलः सखि !-निशाकरः॥१४०॥

जम्भभिदिति—जम्भभित् इन्द्रः तस्य ककुप् दिशा पूर्वा इत्यर्थः तस्याम् यथा यस्मात् शुभ्रम् ज्योतिः प्रकाशः विजृम्भते आविर्भवति, हे सखि ! तथा तस्मात् खलः दुष्टः निशाकरः चन्द्रः उदेष्यति इति मन्ये ।

लक्षण समन्वयः—

अत्र प्रत्यक्षात् शुभ्रप्रकाशविजृम्भणरूपात् लिङ्गात् (साधनात्) अनागतकालसम्बन्धिनः चन्द्रोदयरूपस्य लिङ्गिनः (साध्यस्य) ज्ञानं भवतीति अनुमानालङ्कारः ।

वर्तमानानुमानमुदाहरति—

मुखप्रभाबाधित कान्तिरस्या
दोपाकरः किङ्करतां बिभर्ति ।
तल्लोचन श्रीहृति सापराधा-
न्यञ्जानि नो चेत् किमयं क्षिणोति ॥१४१॥

मुखेति—मुखस्य प्रभया कान्त्या बाधिता तिरस्कृता कान्तिः यस्य तादृशः दोषाकरः चन्द्रः अस्याः कान्तायाः किङ्करताम् सेवकताम् बिभर्ति दधाति । नो चेत् यदि एवं न अस्ति तर्हि अयम् चन्द्रः तस्याः लोचनयोः नेत्रयोः श्रियः शोभायाः हृति

इत्यत्र कथासाधारणानि अपराधभूतानि अन्यानि कथम् निक्षिप्य विपक्षेषु निर्दोषाणि सद्गुणिनामानि करोति ? वस्तुतोऽत्र विरोधिनः स्वरूपतो वर्णि सम्पन्नतम् ।

लक्षण समन्वयः —

अत्र प्रश्नात् वचनमूर्धावचरणस्याम् निद्रात (गायनात्) सर्वदा तत्क्षणस्वरः निद्राः यस्य निद्रायस्य स्थानं पर- मीति सर्वदामानुपात्य ।

परिसंख्यालक्षणम् —

यत्र साधारणं किञ्चिदेकत्र प्रतिपाद्यते ।
अन्यत्र तन्निषेधे सा परिसंख्योच्यते यथा ॥१४२॥

यत्रेति—यत्र किञ्चित् साधारणं सामान्यं वस्तु अन्यत्र तस्य निषेधे अभावसिद्धये एकत्र एकस्मिन् पदार्थे प्रतिपाद्यते सा- ख्येन सा परिसंख्या उच्यते ।

उदाहरणम् —

यत्र वायुः परं चौरः पौर सौरभसंपदाम् ।
युवानश्च कृतक्रोधादेव बिभ्युर्वधूजनात् ॥ १४३ ॥

यत्रेति—यत्र वायुः परम् केवलम् पौराः पुरभवाः नगरवा- सिनः तेषाम् सौरभाणि एव सम्पदः तेषाम् चौरः आसीत् नान्यः इति भावः । युवानश्च तरुणाः अपि कृतक्रोधात् , सञ्जातरोषात् वधूजनात् स्त्रीजनात् एव बिभ्युः ।

लक्षण समन्वयः —

अत्र 'वायुरेव चौरः' इति कथनात् साधारणमपि चौर्यं अन्यत्र (चौरेषु) निषेधाय एकस्मिन् वायौ एव प्रतिपादितम्, एवं सौरभस्यैव चौरः इति कथनात् अन्यत्र (अन्य वस्तुषु)

निवृत्तये केवलं सौरभे एव अपहार्यत्वं प्रतिपादितम् । 'युवानः विभ्युः' इत्यभिधानात् सर्व-साधारणस्यापि भयस्य अन्यत्र बाल-वृद्धेषु निवृत्तये यौवनसम्पन्नेष्वेव प्रतिपादनं कृतम्, एवं 'वधू-जनाद् बिभ्युः' इति कथनात् साधारणमपि भीतिजनक त्वम् अन्यत्र सिंहव्याघ्रादिषु निवृत्तये केवलं क्रुद्धवधूषु प्रतिपादितम् इति परिसंख्या ।

प्रश्नोत्तरं लक्षयति—

प्रश्ने यत्रोत्तरं व्यक्तं गूढं वाप्यथवोभयम् ।

प्रश्नोत्तरम्

प्रश्ने इति–यत्र प्रश्ने सति पृच्छायां जायमानायामित्यर्थः व्यक्तं स्फुटम् वा गूढम् अस्फुटम् अथवा उभयम् स्फुटास्फुटम् उत्तरम् भवति दीयते वा तत् प्रश्नोत्तरम् भवति ।

संकरं लक्षयति—

तथोक्तानां संसर्गं संकरं विदुः ॥ १४४ ॥

तथेति–तथा एवम् उक्तानाम् शब्दार्थालङ्काराणाम् संसर्गम् सम्मेलनम् सङ्करं विदुः अवगच्छन्ति ।

प्रश्नोत्तरमुदाहरति—

अस्मिन्नपार संसार सागरे [illegible] म् ।

किं [illegible] । [illegible] रागद्वेषप [illegible] ४५ ॥

[illegible] । अस्मिन् [illegible] दुस्तर

संसार [illegible] मताम् [illegible]

। रागः [illegible]

अत्रत्य समन्वयः—

अत्र 'किं समाचष्टवान्' इति प्रश्ने 'रागद्वेषपरिहारः' इत्याकारकस्य स्फुटोत्तरस्य प्रदानात् समत्वालङ्कारः ।

बहिरालापोत्तरम्—

क वसन्ति श्रियो नित्यं भूभृतां वद कोविदः ।
असावतिशयः कोपि यदुक्तमपि नोह्यते ॥१४६॥

कीर्ति–हे कोविद! विद्वन्! भूभृताम् राज्ञाम् श्रियः सम्पदः नित्यं क वसन्ति । इति प्रश्नः । कः अपि असाधारणः असौ अतिशयः यत् इदम् अतिक्रान्तः इतस्ततः ऊह्यते न अन्वेषणं कुर्वतः पुरुषस्यापि दुर्लभः इति भावः । अथवा राज्ञां श्रियः तत्रस्थाने निवसन्ति यत् स्थानम् उक्तम् अपि कथितमपि न ऊह्यते ज्ञायते । यद्यपि अत्र उत्तरेण 'राज्ञां श्रियः क वसन्ति?' इति प्रश्नस्य 'असौ' इति उत्तरं दत्तम्, तथापि खड्गवाचक-असिशब्दस्य सप्तम्येकवचनम् 'असौ' इति पदस्य अदः शब्दस्य प्रथमैकवचनसमतया अस्फुटो भवति इति उक्तमपि न ऊह्यते ।

अत्रत्य समन्वयः—

अत्र 'असौ' इत्युत्तरस्य अस्पष्टतया गूढमुत्तरम् ।

गूढव्यस्तसमस्तोदाहरणम्—

किमिभं श्लाघ्यमाख्याति पक्षिणं कः कुतो यशः ।
गरुडः कीदृशो नित्यं दानिवारि विराजितः ॥१४७॥

किमिति–ऐभम् इभस्य इदम् ऐभम् इति सम्बन्धि किं वस्तु श्लाघ्यम् प्रशंसनीयम् ? कः शब्दः पक्षिणम् आख्याति पक्षिवर्णाय वाचकतया कथयति इति भाव ? यशः कीर्तिः कुतः कस्मात् भवति ? गरुडः तदाख्यः पक्षी नित्यम् कीदृशः ? एते चत्वारः

प्रश्नाः। तेषां क्रमेण उत्तराणि—१ हस्तिसम्बन्धि प्रशस्यं वस्तु 'दानवारि' (मदजलम्) अस्ति; २ पक्षिणं 'विः' अयं शब्द आख्याति; ३ यशः 'आजितः' (संग्रामात्) भवति; ४ गरुडः नित्यं 'दानवारिविराजितः' (विष्णु सुशोभितः) अस्ति।

लक्षण समन्वय—

अत्र पूर्वोक्तानां त्रयाणां प्रश्नानामुत्तराणि 'दानवारि' 'विः' 'आजितः' इत्यात्मकानि असुखबोधतया गूढानि; चतुर्थस्य प्रश्नस्य 'दानवारिविराजितः' इत्युत्तरं तु सुखबोधतया व्यक्तम् इति प्रश्नोत्तराणां उभयात्मकतया गूढव्यक्तप्रश्नोत्तरालङ्कारः।

सङ्करमुदाहरति—

बम्भण्डसुत्ति संपुड मुक्ति अमणिणो पहासमूह व्व।
सिरिवाहडत्ति तणओ आसिबहोतस्स सोमस्स ॥१४८॥
(ब्रह्माण्ड शुक्ति संपुटमौक्तिकमणेः प्रभासमूह इव।
श्रीवाग्भट इति तनयः आसिद्बुधस्तस्य सोमस्य ॥)

ब्रह्माण्डेति—ब्रह्माण्डं जगत् एव शुक्तिः तस्याः सम्पुटे अभ्यन्तरे, यः मौक्तिकमणिः तस्य प्रभासमूहः किरणराशिरिव तस्य सोमस्य तत्र स्तः पितुः बुधः पण्डितः श्री-वाग्भटः इति एतन्नामा तनयः पुत्रः आसीत्।

लक्षण समन्वयः—

अत्र 'ब्रह्माण्डशुक्तिः' इति रूपकम्, 'प्रभासमूह इव' इत्युत्प्रेक्षा, 'सोमस्य चन्द्रस्य तनयः पुत्रः बुधः नामा ग्रहः आसीत्' इति श्लेषः इति त्रयाणामलङ्काराणामत्र संसर्गात् सङ्करालङ्कारः

ग्रन्थान्तरोक्ता अलङ्कारा अत्र किमर्थं नोक्ता इत्याह—

अचमत्कारिता वास्यादुक्तान्तर्भाव एव वा।

अलंक्रियाणा मन्यासामनिबन्धे निबन्धनम् ॥१४९॥

अचमत्कारितेति–अचमत्कारिता वैचित्र्यशून्यता वा अथवा उक्तेषु अस्मिन् ग्रन्थे प्रतिपादितेषु अलङ्कारेषु अन्तर्भावः एकरूपतया अभिव्यक्ता प्रतिपादनम् एव अन्यासाम् उक्तालङ्कारेभ्यो भिन्नानाम् अलंक्रियाणाम् अलङ्काराणाम् अनिबन्धे अत्र अकथने निबन्धनम् कारणम् अस्ति।

अथ रीतिमाह—

द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे।
एकाभूयः समासास्या दसमस्तपदा परा ॥ १५० ॥

द्वे इति–रीतिः रसानुसारिशब्दसङ्घटना विशेषः। तदेवाह दर्पणकारः–" पदसङ्घटना रीतिरङ्गसंस्था विशेषवत् " इति। सा रीतिः द्विप्रकारा वर्तते गौडीया वैदर्भी चेति। एका आद्या (गौडीया) भूयः समासा समासबहुला, अपरा द्वितीया (वैदर्भी) असमस्तानि समासशून्यानि पदानि यत्र तादृशी समासरहिता इत्यर्थः अस्ति।

गौडीयोदाहरणम्—

दर्पोत्पाटित तुंग पर्वत शतग्राव प्रपाताहति–
क्रूराक्रन्ददतुच्छ कच्छपकुलकेङ्कार घोरीकृतः।
निर्भ्रं वर्वर वध्यमान पयसः सिप्रापगायाः स्फुर–
न्नाक्रामत्ययमक्रमेण बहुलः कल्लोल कोलाहलः ॥१५१

दर्पेति–बर्बरेण महाकायेन राक्षसेन बध्यमानम् रुद्ध्यमानम् पयः जलम् यस्याः तस्याः सिप्रापगायाः सिप्रानद्याः दर्पेण अभिमानेन उत्पाटितानां तुङ्गपर्वतानाम् उच्चपर्वतानाम् यत् शतम् तस्य ये ग्रावाणः शिलाः तेषां प्रपातेन पतनेन या आहतिः

